2

हरि

द्वितीय स्कंधः

Shreemad- Bhagavatham
Dwitiya. Skandhah II

अथ

द्वितीय स्कंधः

कीर्तन २ नाममात्रेणवस्तुसंकीर्तनमुद्देशः असाधारणधर्मवचनंलक्षणं २

भा० द्वि० २

श्रीराधाकृष्णौजयतः ॥ द्वितीयेतुदशाध्यायेश्रीभागवतमादितः उद्देशलक्षणाभ्यांसंक्षेपेणोपवर्ण्यते ॥ तत्रतुप्रथमेध्यायैश्रवणादिभिः ॥ स्थविष्ठेभगवद्रूपेमनसोधारणोच्यते यन्नामकीर्तनंदानतपोयोगादिसत्फलं तन्नित्यंपरमानंदंहरिंनरनमस्मर ॥ अथद्वितीयस्कंधव्याख्या उक्तएवमुपोद्घातःसप्रसंगःशुकागमः राज्ञापृष्टंचतत्कृत्यमथाहशुकःसन्मुनिः ॥ राज्ञःप्रश्नमभिनंदति वरीयानिति त्वयापुंसांश्रोतव्यादिषुमध्येयःपरःश्रेष्ठःप्रश्नःकृतःएष वरीयान् यतोलोकहितमेतत् मोक्षहेतुत्वात् आत्मविद्भिर्मुक्तानांचसंमतोयतः १ तत्रतावत्स्वाभाविकक्रियालोभेन

श्रीशुकउवाच ॥ वरीयानेषतेप्रश्नःकृतोलोकहितंनृप आत्मवित्संमतःपुंसांश्रोतव्यादिषुयःपरः १ श्रोतव्यादीनिराजेंद्रनृणांसंतिसहस्रशः अपश्यतामात्मतत्वंगृहेषुगृहमेधिनां २ निद्रयाह्रियते नक्तंव्यवायेनचवावयः दिवाचार्थेहयाराजन्कुटुंबभरणेनवा ३ देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि तेषांप्रमत्तोनिधनंपश्यन्नपिनपश्यति ४

यद्धेतुत्वंवदन् ब्रूहियद्वाविपर्ययमित्यस्योत्तरमाह श्रोतव्यादीनीतित्रिभिः गृहेषुसक्तानां अतएवगृहमेधिनांतद्धतपंचसूनांप्राणानां मेधतिर्हिंसार्थः २ तेषांकथंवायुर्व्ययोभवतीत्याह नक्तंरात्रौयद्वयःआयुःतन्निद्रयाव्यवायेनरत्यावाह्रियते. दिवाअपियद्वयःतत् अर्थेहयाअर्थार्थमुद्यमेनसिद्धेर्थेकुटुंबपोषणेनवा चकारावनुक्तसमुच्चयार्थौ ३ ननुनममकुटुंबाद्यर्थंकथंमायुर्व्ययंकुर्यात्तत्राह देहादिषुआत्मनःसैन्येषुपरिकरेषुअसत्सुमिथ्याभूतेष्वपिप्रमत्तःप्रसक्तःतेषांपित्रादीनांदृष्टांतेन

१

साधकानांसिद्धानांचनातःपरमन्यच्छ्रेयोस्तीत्याह एतदिति इच्छतांकामिनांतत्तत्फलसाधनमेतदेवनिर्वि
द्यमानानांमुमुक्षूणांमोक्षसाधनमेतदेव योगिनांज्ञानिनांफलंचैतदेवनिर्णीतं नात्रप्रमाणंवक्तव्यमित्यर्थः
११ अल्पमेवायुरवशिष्टंकिंमहंसाधयेयमितिमाशुचइत्याह किमितित्रिभिः परोक्षैरव्यक्तैर्हायनैर्वर्षैः
विदितंरध्यायान्नीतिज्ञातं यतोयेनज्ञानेनघटेतयत्नंकरोति १२ खट्वांगोहिदेवपक्षेस्थित्वादैत्यान्जयन्

एतन्निर्विद्यमानानामिछतामकुतोभयं योगिनांन्रपनिर्णीतंहरेर्नामानुकीर्तनं ११ किंप्रमत्त
स्यवहुभिःपरोक्षैर्हायनैरिह वरंमुहूर्तंविदितंघटेतश्रेयसेयतः १२ खट्वांगोनामराजर्षिर्ज्ञा
त्वेयत्तामिहायुषः मुहूर्तात्सर्वमुत्सृज्यगतवानभयंहरिं १३ तवाप्येतर्हिकौरव्यसप्ताहंजीवि
तावधिः उपकल्पयतत्सर्वंतावद्यत्सांपरायिकं १४ अंतकालेतुपुरुषआगतेगतसाध्वसः छिंद्या
दसंगशस्त्रेणस्पृहांदेहेनुयेचतं १५

ततःप्रसन्नैर्देवैर्वरंवृणीष्वेत्युक्तेतेनोक्तंप्रथमंतावन्ममायुः
कथ्यतामिति ततोदेवैरुक्तंतत्तुमुहूर्तमात्रमस्तीति ततोसौशीघ्रंविमानेनभुवमागत्यहरिंशरणंगतइतिय
तइयस्वर्गस्तत्रभिःरजोधिका कर्मभूमिःपृथ्वी १३ तवतुएतर्ह्यपिइदानीमपितावदिति तावताकालेनसांपरा
यिकंपारलौकिकंसाधनंसंपादय १४ तत्रवैराग्यंतावदाह अंतकालइति गतसाध्वसःमृत्युभयशून्यःअ
संगोगोनामअनासक्तिस्तेनशस्त्रेणस्पृहांसुखेच्छांतंदेहंअनुयेपुत्रकलत्रादयस्तेष्वपिस्पृहांछिंद्यात् १५ २

एवं विपर्यय प्रश्नस्योत्तरमुक्त्वा श्रोतव्यादि प्रश्नस्योत्तरमाह तस्मादिति हे भारत भरतवंश्य सर्वात्मेति प्रेष्ठत्वमाह भग
वानिति सौंदर्यमीश्वर इत्यावश्यकत्वं हरिरिति बंधहारित्वं अभयं मोक्षमिच्छता ५ अतः परमन्यच्छ्रेयो नास्तीत्याह एतावा
निति जन्मनो लाभः फलं तमाह नारायणस्मृतिरिति सांख्यादिभिः साध्य इति तेषां स्वातंत्र्येण लाभत्वं वारयति सांख्यमा
त्मानात्मविवेकः योगोऽष्टांगः अंते तु स्मृतिः परो लाभः नतन्महिमा वक्तुं शक्य इत्यर्थः ६ तत्र सदाचारं प्रमाणयति प्रा

तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ५ एतावान्सांख्य
योगाभ्यां स्वधर्मपरिनिष्ठया जन्मलाभः परः पुंसामंते नारायणस्मृतिः ६ प्रायेण मुनयो राजन्निवृ
त्ता विधिनिषेधतः नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ७ इदं भागवतं नाम पुराणं ब्रह्मसंमितं अ
धीतवान्द्वापरादौ पितुर्द्वैपायनादहं ८ परिनिष्ठितोपि नैर्गुण्य उत्तमश्लोकलीलया गृहीतचेता राज
र्षे आख्यानं यदधीतवान् ९ तदहं तेऽभिधास्यामि महापौरुषिको भवान् यस्य श्रद्दधतामाशु स्यान्मुकुंदे म
तिः सती १०

प्रायेणेति विधिषेधतः विधिनिषेधाभ्यां निवृत्ताः निर्लेपा अपि नैर्गुण्ये ब्रह्मणि स्थिता अपि स्म प्रसिद्धं ७ किमिदमपू
र्वं कथयसि सत्यं अत्यपूर्वमेवेदमित्याह इदं भागवतं प्रोक्तं तन्नामैकप्रधानं पुराणं ब्रह्मसंमितं सर्ववेदतुल्यं यद्वा
ब्रह्म सम्यक् मितं येन कुतस्त्वया प्राप्तमत आह अधीतवानिति ८ किंतु स्यतत्त्वकुतोध्ययने प्रवृत्तिः तत्राह परिनि
ष्ठितोपीति गृहीतचेताः आकृष्टचित्तः ९ महापुरुषो विस्तुत्तदीयः यस्य यस्मिन् श्रद्धां कुर्वतां सती अहैतुकी १०

भा० द्वि० २

यतः यस्यां क्रियमाणायां भद्रं सुखात्मकं आश्रयं विषयं पश्यतस्तत्रैव प्रीतिर्भवति २१ यथा यत्र या यादृशी चेति क
र्त्तव्यता विषयतद्विशेषणानां प्रश्नाः २२ यथेत्यस्योत्तरं जितासन इति विषयमाह स्थूल इति सार्द्धेन २३ विशेषो वि
राट्देहः श्रुतिस्थूलानामपि स्थूलतरः सत्कार्यमात्र २४ अस्यैवोपलक्षणत्वेन विषयत्वं वस्तुतस्तु विराड्जीवनि
यन्ता भगवानेव विषय इत्याह अंडकोशेंतर्वर्त्तिकराह एव पृथिव्यावरणं ततोऽप्तेजोवाय्वाकाशाहंकारमह

यतः संधार्यमाणायां योगिनो भक्तिलक्षणः आशु संपद्यते योग आश्रयं भद्रमीक्षतः २१ ॥ राजो
वाच ॥ यथा संधार्यते ब्रह्मन् धारणा यत्र संमता यादृशी वा हरेदाशु पुरुषस्य मनोमलं २२ ॥ श्रीशु
क उवाच ॥ जितासनो जितश्वासो जितसंगो जितेंद्रियः स्थूले भगवतो रूपे मनः संधारयेद्धिया २३
विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् २४ अंडकोशे
शरीरेस्मिन् सप्तावरणसंयुते वैराजः पुरुषो योसौ भगवान् धारणाश्रयः २५ पातालमेतस्य हि
पादमूलं पठंति पार्ष्णिप्रपदे रसातलं महातलं विश्वसृजोथ गुल्फौ तलातलं वै पुरुषस्य जंघे २६

त्तत्त्वानीति सप्त २५ विराट्देहस्तज्जीवस्तदंतर्यामिणामभेदमारोप्योपासनं कर्त्तव्यमित्याशयेनाह पातालं पाद
मूलं पादस्याधोभागः पातालादीनां तदवयवेव यत्ता विधीयते पातालादीन्यतलांतानि अपस्थानादारभ्य सप्तभू
मिविवराणि पठंति गणतीत्यादि प्रमाणप्रदर्शनेन पार्ष्णिप्रपदे पादस्य पश्चादग्रभागौ २६

२

किंच गृहात्प्रव्रजित निर्गतः गृहे स्थितस्य पुनरप्यासक्तिः संभवात् तत्राष्टांगयोगमाह धीर इति ब्रह्मचर्यादिय
मोपलक्षणं पुण्यतीर्थेति स्नानादिनियमोपलक्षणं आसनमाह शुचाविति विविक्ते एकांते विधिवत् कुश
जिनचैलोत्तरैः क्रमेण निर्मिते जपगर्भं प्राणायामं वक्तुं जप्यमाह त्रिवृत् त्रिभिरकारादिभिर्वर्णैरिति ग्रथितं
ब्रह्माक्षरं प्रणवं मनसाभ्यसेत् आवर्तयेत् मनसा इंद्रियप्रत्याहारं वक्तुं प्राणायामेन मनोनियमनमाह
मनो यच्छेत् ब्रह्मबीजं प्रणवमविस्मरन्नेव जितश्वासः सन् १६ प्रत्याहारमाह नियच्छेत् अक्षान् इंद्रियाणि

गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः शुचौ विविक्त आसीनो विधिवत्कल्पितासने अभ्यसेन्म
नसा शुद्धं त्रिवृद्ब्रह्माक्षरं परं मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् १६ नियच्छेद्विषयेभ्योऽक्षान्म ये
नसा बुद्धिसारथिः मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया १७ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा
१८ मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत् पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति १९ रजस्तमोभ्या
माक्षिप्तं विमूढं मन आत्मनः यच्छेद्धारणया धीरो हंति या तत्कृतं मलं २०

मनसा आत्मिका बुद्धिः सारथिर्यस्य सः धारणमाह मन इति पुनः स्वकर्मभिस्तद्वासनाभिराक्षिप्तं आकृष्टं शुभार्थे भगवद्रूपे
१७ ध्यानमाह तत्रेति एकमेकं पादाद्यवयवं अव्युच्छिन्नेन समग्ररूपादवियुक्तेन आश्रयविशेषे सामान्यतश्चित्तस्य स्थिरी
करणं धारणा अवयवविभागेन यातत् हार्दं ध्यानमिति भेदः १८ समाधिमाह निर्विषयं मनो युक्त्वा समाधाय स्थि
रीभूते मनसि स्फुरत्परमानंदमात्राकारं कृत्वेत्यर्थः प्रसीदति उपशाम्यति १९ गुणवशात्पुनरपि क्षोभे सति धार
णामेव स्थिरीकुर्यादित्याह रजसा आक्षिप्तं तमसा विमूढं स्वीयं मनो निरुंध्यात् तत्कृतं रजस्तमोभ्यां कृतं मलं २०॥

अनंतवीर्य्यंयस्यसः वयःकालस्तस्यगमनं गुणप्रवाहः प्राणिनांसंसारः कर्मतस्यक्रीडा ३३ भूम्नः विभोः अव्यक्तं
प्रधानं सः प्रसिद्धः चंद्रमाः तदीयं मनः सर्वेषांविकाराणांकोशइवाश्रयभूतं ३४ विज्ञानशक्तिंचित्तंमहिम
हत्तत्वंअंतःकरणं अहंकारंगिरित्रंश्रीरुद्रं गर्द्दभाद्वडवायामुत्पन्नोअश्वतरी ३५ वयांसिपक्षिणः तस्यव्याकर

नद्योस्यनाड्योथतनूरुहाणिमहीरुहाविश्वतनोर्नृपेंद्र अनंतवीर्य्यःश्वसितंमातरिश्वागतिर्वयः
कर्मगुणःप्रवाहः ३३ ईशस्यकेशान्विदुरंबुवाहान्वासस्तुसंध्यांकुरुवर्य्यभूम्नः अव्यक्तमाहुर्हृद
यंमनश्चसचंद्रमाःसर्वविकारकोशः ३४ विज्ञानशक्तिंमहिमामनंतिसर्वात्मनोन्तःकरणंगि
रित्रं अश्वाश्वतर्युष्ट्रगजानखानिसर्वेमृगाःपशवःश्रोणिदेशे ॥ ३५ वयांसितद्व्याकरणंविचित्रं
मनुर्मनीषामनुजोनिवासः गंधर्वविद्याधरचारणाप्सरःस्वरस्मृतीरसुरानीकवीर्य्यः ३६ ॥ ऽऽ

णंनामरूपेव्याकरवाणीतिश्रुतेःकौशल्यंनैपुण्यं यथाहुः येनशुक्लीकृताःहंसाः शुकाश्चहरितीकृताः म
यूराश्चित्रितायेनसतेवृत्तिंविधास्यतीति मनुःस्वायंभुवः मनीषाबुद्धिः मनुजःपुरुषः निवासः आश्रयः पु
षत्वेचाविस्तरामात्मेतिश्रुतेः गंधर्वादीनांहृदैक्यं गंधर्वादयःस्वरस्मृतीः षड्जादिस्वरस्मृतयइत्यर्थः अ
सुरानीकंवीर्य्यंयस्यसः स्वरःस्मृतिरसुरानीकवर्य्यइतिपाठेगंधर्वादयःस्वरः असुरसमूहश्रेष्ठःप्रह्लादः

उरुद्वयंतस्यअधोभागेवितलंउत्तरभागेअतलमितिज्ञेयं नभस्तलंभुवर्लोकंनाभिरेवसरः २७ ज्योतिरनीकंज्यो
तिषांसमूहः स्वर्गं महर्लोकंग्रीवेतिगृणंति तपोलोकंवराटींललाटं सत्यंसत्यलोकं २८ उस्रादेवाः तेजोमयश
रीरत्वात्तेवाहवइत्याहुः दिशःअस्मदादिश्रोत्राधिष्ठात्र्योदेवताः कर्णौश्रोत्रस्याधिष्ठानं शब्दस्तुश्रोत्रविष

द्वेजानुनीसुतलंविश्वमूर्तेरूरुद्वयंवितलंचातलंच महीतलंतज्जघनंमहीपतेनभस्तलंनाभिस
रोगृणंति २७ उरःस्थलंज्योतिरनीकमस्यग्रीवामहर्वदनंवैजनोस्य तपोवराटींविदुरादिपुं
सःसत्यंतुशीर्षाणिसहस्रशीर्ष्णः २८ इंद्रादयोबाहवआहुरुस्राःकर्णौदिशःश्रोत्रममुष्यशब्दः ॥
नासत्यदस्रौपरमस्यनासेघ्राणोस्यगंधोमुखमग्निरिद्धः २९ द्यौरक्षिणीचक्षुरभूत्पतंगःपक्ष्माणि
विष्णोरहनीउभेच तद्भ्रूविजृंभःपरमेष्ठिधिष्ण्यमापोस्यतालूरसएवजिह्वा ३० छंदांस्यनंतस्यशिरोगृ
णंति दंष्ट्रायमःस्नेहकलाद्विजानि हासोजनोन्मादकरीचमायादुरंतसर्गोयदपांगमोक्षः ३१ व्रीडो
त्तरोष्ठोऽधरएवलोभोधर्मःस्तनोऽधर्मपथोस्यपृष्ठं कस्तस्यमेढ्रंवृषणौचमित्रौकुक्षिःसमुद्रागिरयोऽ
स्थिसंघाः ३२

यःसतस्यश्रोत्रेंद्रियं एवंनासिकादिष्वपि नासत्यदस्रौअश्विनौनासेनासापुटे इद्धः दीप्तः २९ द्यौरंतरिक्षं अक्षि
णीनेत्रगोलके चक्षुरिंद्रियं पतंगःसूर्यः अहनीरात्र्यहनी परमेष्ठिधिष्ण्यंब्रह्मपदं तालुःअधिष्ठानं जिह्वाइं
द्रियं ३० छंदांसिवेदाः शिरोब्रह्मरंध्रं स्नेहकलाःपुत्रादिस्नेहलेशाः द्विजानिदंताः षष्ठत्वमार्षं दुरंतःअपारःसर्गोयस्मा

त्ियत्सतस्यकटाक्षः ३१ अधर्ममार्गोस्यपृष्ठभागः कः
प्रजापतिः मित्रौमित्रावरुणौ ३२

भा० द्वि०
५

द्वितीये तु ततः स्थूलधारणाजितं मनः सर्वसाक्षिणि सर्वेशे विशोध्यं ध्यायमितीर्य्यते इह स्थात्वं वनरूपैवमुक्त्वा वैराज
धारणा इहोच्यते तु तत्साध्या सर्वान्तर्य्यामिधारणा तत्र तावत्पूर्वोक्तधारणाया अवान्तरफलमाह एवं यथा धारणा तया
तुष्टाद्धरेः पुरा प्रलयसमये नष्टां सृष्टिस्मृतिं प्रत्यवरुध्य लब्ध्वा अप्ययात् प्राग्यथासीत्तथा ससर्ज व्यवसाया
त्मिका बुद्धिर्यस्य अतएवामोघा दृष्टिर्यस्येति अतस्तया धारणया विक्षेपराहित्यसामर्थ्यं भवति १ उपासनाफलादि
पि विरक्तस्य मुमुक्षोर्धारणायामधिकारः अतो वैराग्यार्थं सर्वं कर्मफलं निंदति शाब्दस्येति शब्दमयं ब्रह्म वेदस्तस्य ए

ध्या १ श्रीशुक उवाच ॥ एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् तथा ससर्जेदममोघदृष्टि
र्यथाप्ययात्प्राग्व्यवसायबुद्धिः १ शाब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः प
रिभ्रमंस्तत्र न विंदतेर्थान्मायामये वासनया शयानः २ अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्य
वसायबुद्धिः सिद्धेन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥

ष पंथाः कर्मफलबोधनप्रकारः कोसौ अपार्थैर्नामभिः स्वर्गादिनामभिः साधकस्य धीर्ध्यायति तत्तदिच्छां करोतीति य
त् अपार्थत्वमेवाह तत्र मायामये पशुसुखमिति वासनया शयानः स्वप्नवत्पश्यन्निव परिभ्रमन्नर्थान्न विंद
ति तत्र लोकं प्राप्तोपि निर्वृतिसुखं न लभत इत्यर्थः २ तर्हि सर्वथा कर्मफलत्यागे सद्य एव देहपातः स्यादित्याशंक्याह
अतः कविर्नामसु मात्रेषु भोग्येषु यावतार्थेन अर्थो देहनिर्वाहो यस्य तत्प्राप्तः स्यात् अप्रमत्तः तावन्मात्रे प्यनासक्तो
व्यवसायबुद्धिर्नेदं सुखमिति निश्चयवान् तदापि तत्रैतस्मिन्नर्थे अन्यथैव सिद्धे तित्तत्र यत्ने परिश्रमं पश्यन्न यतेत ३ ५

ब्रह्माविप्रस्तस्याननंमुखं क्षत्रंक्षत्रियोभुजायस्य विट्वैश्यःऊरूयस्य अंघ्रिश्रितःकृष्णवर्णःशूद्रोयस्यनाना
भिधानामानियेषांतेचतेऽभीज्यादेवास्तेषांगणैर्वसुरुद्रादिभिरुपपन्नोयुक्तः द्रव्यात्मकोहविःसाध्यःवितानयोगः
यज्ञप्रयोगस्तस्यकर्मकार्यं आवश्यकोभिप्रेतइत्यर्थः ३७ इयान्एतावान्सन्निवेशः अवयवसंस्थाना अस्मिन्
स्वबुद्ध्यामनःसंधार्यतेमुमुक्षुभिः यतोव्यतिरिक्तंकिंचिन्नास्तितस्मिन् ३८ तदेवंचिंतस्थेयर्थ्यविराट्देहजीवेषु

ब्रह्माननंक्षत्रभुजोमहात्माविडूरुरंघ्रिश्रितकृष्णवर्णः नानाभिधाभीज्यगणोपपन्नोद्रव्यात्मकःक
र्मवितानयोगः ३७ इयानसावीश्वरविग्रहस्ययःसन्निवेशःकथितोमयाते संधार्यतेऽस्मिन्वपुषि
स्थविष्ठेमनःस्वबुद्ध्यानयतोस्तिकिंचित् ३८ ससर्वधीवृत्त्यनुभूतसर्वआत्मायथास्वप्नजनेक्षितैकः
तंसत्यमानंदनिधिंभजेतनान्यत्रसज्जेद्यतआत्मपातः ३९ ॥इतिश्रीमद्भागवतेमहापुराणेपारमहं
स्यांसंहितायांवैयासिक्यांद्वितीयस्कंधेमहापुरुषसंस्थानुवर्णनेप्रथमोध्यायः॥ १॥

णाभेदेनोपासनमुक्तं तत्रतुदेहजीवावीश्वरेप्रविलाप्यसएवध्येयइतिनिर्द्धारयति सइति सर्वेषांधीरति
भिरनुभूतंसर्वंयेन सएकएवसर्वांतरात्मा तमेवसत्यंभजेत अन्यत्रोपलक्षणेनसज्जेत यतःआसंगादात्म
नःपातःसंसारोभवति एकस्यतत्तदिंद्रियैःसर्वानुभूतौदृष्टांतः स्वप्नजनानामीक्षितायथेति स्वप्नेहिकदाचि
द्रूपंतन्प्रकल्प्यजीवस्तत्तदिंद्रियैःसर्वंपश्यतितद्वत् जीवस्त्वज्ञत्वात्बध्यते ईश्वरस्यतुविद्याशक्तित्वान्नबंधः

एतदेवान्यचिंतानिंदया द्रढयति कइति तां तथाभूतां परस्य हरेरनुचिंतां धारणाम् अनादृत्य पशून् कर्मजडान् विना य
था पशुरेव स देवानामिति श्रुतेः असतीं विषयचिंतां को नाम कुर्यात् तथा वैतरण्यां पतितं तत्र च स्वकर्मजान् आ
ध्यात्मिकादिक्लेशान् सेवमानं जनं पश्यन् वैतरणी यमद्वारस्था नदी तत्तुल्यत्वात् संसृतिर्वैतरणी ७ तामेव धारणां सवि
शेषणामाह केचिदिति षड्भिः स्वदेहस्यांतर्मध्ये यत् हृदयं तत्र योवकाशस्तस्मिन् वसंतं प्रादेशस्तर्जन्यंगुष्ठयोर्विस्तारः
स एव मात्रा प्रमाणं यस्येति हृदयपरिमाणेन त्वोपचर्यते कंजं पद्मं रथांगं चक्रं ८ नलिनं पद्मं तद्वत् प्रसन्ने आयते ई

कस्तां त्वनादृत्य परानुचिंताम् ऋते पशून् असतीं नाम कुर्यात् पश्यन् जनं पतितं वैतरण्यां स्वकर्मजान् परितापान् जुषा
णं ७ केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतं चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्म
रंति ८ प्रसन्नवक्त्रं नलिनायतेक्षणं कदंबकिंजल्कपिशंगवाससं लसन्महारत्नहिरण्मयांगदं स्फुरन्म
हारत्नकिरीटकुंडलं ९ उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं श्रीलक्ष्मणं कौस्तुभर
त्नकंधरम् अम्लानलक्ष्म्या वनमालयाचितम् १०

क्षणे यस्य कदंबकुसुमस्य किंजल्काः केशराः तद्वत् पिशंगे पीते वाससी यस्य लसंति महारत्नानि येषु तानि सु
वर्णमयान्यंगदानि यस्य स्फुरंति च तानि महारत्नानि च तन्मयानि किरीटकुंडलानि यस्य ९ उन्निद्रं विकसितं यद्धृ
त्पंकजं तस्य कर्णिकैवालयः स्थानं तस्मिन् योगेश्वरैरास्थापितौ पादपल्लवौ यस्य श्रीरेव लक्ष्म चिह्नं तद्युक्तं पामा
दिविहितो मत्वर्थीयो नप्रत्ययः कौस्तुभरत्नं कंधरायां यस्य अम्लाना लक्ष्मीः शोभा यस्याः तया वनमालया आचितं
व्याप्तम् १०

अन्यथासिद्धिमाह द्वाभ्यां सत्यामिति कशिपोः शय्यायाः स्वतःसिद्धे बाहौ सति उपबर्हणैः उच्छीर्षकैः पुरुधा बहुप्रकार
याऽन्नपात्र्या भोजनपात्रेण ४ ननु दिक्सभावो नाम नग्नत्वमेव वल्कलमुक्तं तोयं वासस्थानं च याच्ञाप्रवृत्तिं विना
कथं प्राप्येत तत्राह चीराणि वस्त्रखंडानि परान् बिभ्रतीति परभृतः फलादिभिर्ये गुहाः गिरिदर्य्यः ननु कदाचिदेषामला
किं कार्य्यं तत्राह अजितो हरिः उपसन्नान् शरणागतान् किं न रक्षति किंशब्दस्य सर्वत्रापि संबंधः धनेन ये दुर्मद

सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किं सत्यंजलौ किं पुरुधान्नपात्र्या दिग्वल्क
लादौ सति किं दुकूलैः ४ चीराणि किं पथि न संति दिशंति भिक्षां नैवांघ्रिपाः परभृतः सरितोप्यशुष्यन्
व३ रुद्धा गुहाः किमजितोऽवति नोपसन्नान् कस्माद्भजंति कवयो धनदुर्मदांधान् ५ एवं स्वचित्ते स्वत एव सि
द्ध आत्मा प्रियोऽर्थो भगवाननंतः तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ६

स्तेनांधान् ५ तदाऽनेन किं कर्त्तव्यं हरिस्तु सेव्य इत्याह एवं विरक्तः सन् तं भजेत भजनीयत्वे हेतवः स्वचित्ते
स्वत एव सिद्धः यतः आत्मा अत एव प्रियः प्रियस्य च सेवा सुखरूपैव अर्थः सत्यः न त्वात्मवन्मिथ्या भगवान् भ
जनीयगुणस्य अनंतस्य नित्यः य एवंभूतस्तं भजेत नियतार्थः निश्चलस्वरूपः तदनुभवानंदेन निर्वृतः सन्नि
ति स्वतः सुखात्मकत्वं दर्शितं किंच यत्र यस्मिन् भजने सति संसारहेतोरविद्याया उपरमो नाशो भवति ६ ॥ ६६

भा० द्वि० एवंतावदासन्नमृत्योःपुंसःकृत्यमुक्तंइदानींतस्यैवस्वयंदेहंत्यक्तुमिच्छतःकृत्यमाह स्थिरमितिसार्द्धैस्त्रिभिः त्रि
७ णहेराजन्एवंभूतोयतिर्यदाइमंलोकंदेहं जिहासुःहातुमिच्छति तदादेशेपुण्यक्षेत्रेकालेचउत्तरायणादौमनो
नसज्जयेत् संगंनप्रापयेत् नदेशकालौयोगिनःसिद्धिहेतूकिंतुयोगएवेति दृढनिश्चयोभूत्वास्थिरंसुखकरंचा
सनमास्थितःप्राणान्नियच्छेदित्यर्थः १५ एतांबुद्धिंक्षेत्रज्ञेबुद्ध्यादिद्रष्टरिनिनयेत्प्रविलापयेत् तंचक्षे
त्रज्ञंआत्मनिशुद्धे तंचशुद्धमात्मानं आत्मनिशुद्धेब्रह्मणिअवरुध्यएकीकृत्यलब्धोपशांतिःप्राप्तनिर्वृतिः

स्थिरंसुखंचासनमास्थितोयतिर्यदाजिहासुरिममंगलोकं कालेचदेशेचमनोनसज्जयेत्प्रा
णान्नियच्छेन्मनसाजितासुः १५ मनःस्वबुद्ध्यामलयानियम्यक्षेत्रज्ञएतांनिनयेत्तमात्मनि आत्मा
नमात्मन्यवरुध्यधीरोलब्धोपशांतिर्विरमेतकृत्यात् १६ नयत्रकालोनिमिषांपरःप्रभुःकुतोनुदे
वाजगतांयईशिरे नयत्रसत्वंनरजस्तमश्चनवैविकारोनमहान्प्रधानम् १७

सन् कृत्याद्विरमेत् ततःपरंप्राप्तव्याभावात् १६ तदेवाह नयत्रेति यत्रात्मस्वरूपेकालोनप्रभुःकिमपिक
६२ र्तुंनसमर्थः अतएवदेवाःनप्रभवंतीत्याह अनिमिषांदेवानांपरःप्रभुःतत्रकुतोनुदेवाःप्रभवःईशने नि
यम्यानांतुजगतांकावार्त्तेत्याह जगतामिति कुतोनप्रभवंतीत्यपेक्षायांनिरुपाधित्वादित्याह नयत्रेति य ७
त्रजगत्कारणान्यपिनयस्यसत्त्वाद्योप्रभवंतीत्याह नयत्रेति विकारोअहंकारः १७

स्निग्धत्वादिविशेषैःकुंतलैर्विरोचमानेआननेयोहासःतेनपेशलंसुंदरं ११ अदीनंउदारंयल्लीलाहसितं
तेनपरीहृएंतस्मिन्उल्लसंतोयेभ्रूभंगास्तैःआविष्कृतोपाक्तैःसंसूचितोभक्तैरनुग्रहोयेनचिंतामयंचिन्तयास्वा
विर्भवंतं १२ अस्यैवध्यानमाह एकैकश इति अनुभावयेत्ध्यायेत् यद्यज्ञितंअयत्नतःस्फुरितंपादगुल्फा

र्महार्हधनैर्नूपुरकंकणादिभिः स्निग्धामलाकुंचितनीलकुंत
विभूषितंमेखलयांगुलीयकै
लैर्विरोचमानाननहासपेशलं ११ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्र
हं ईक्षेतचिंतामयमेनमीश्वरं यावन्मनोधारणयावतिष्ठते १२ एकैकशोंगानिधियानुभावयेत्
ध्य पादादियावद्धसितंगदाभृतः जितंजितंस्थानमपोह्यधारयेत्परंपरंशुध्यतिधीर्यथायथा १३ या
वन्नजायेतपरावरेस्मिन्विश्वेश्वरेद्रष्टरिभक्तियोगः तावत्स्थवीयःपुरुषस्यरूपंक्रियावसानेप्र
यतःस्मरेत् १४

दिस्थानंअवयवस्तत्तदपोह्यत्यक्त्वापरंपरंजंघाजान्वादिधारयेत्ध्यायेत् शुध्यतितस्मिन्निश्चलाभवति
१३ पूर्वोक्तवैराग्यधारणयाएतद्ध्यानंप्राप्तत्वमाह यावदितिपरेब्रह्मादयोवरेयस्मात्कुतः विश्वेश्वरेद्रष्टरि
नतुदृश्येचैतन्यघनत्वात् भक्तियोगःप्रेमलक्षणःक्रियावसानेआवश्यककर्मानुष्ठानानंतरम् अनेन
कर्मापिभक्तियोगपर्यंतमेवेत्युक्तम् १४

भा० द्वि० सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीतिदशभिः यदितु पारमेष्ठ्यं पदं प्रयास्यन्भवति वैहायसानां खेचराणां सिद्धानां
८ यद्विहारं क्रीडास्थानं कीदृशं अष्टावाधिपत्यानि अणिमाद्यैश्वर्याणि यस्मिंस्तदपि प्रयास्यन् कगुणसन्निवाये गुणस
मुदाये रूपे ब्रह्मांडे सर्वत्रेत्यर्थः तर्हि देहत्यागावसरे मनश्चेंद्रियाणि च न त्यजेत् किंतु तैः सहैव तत्तल्लोकभोगार्थं गच्छेत्
२२ यतः कर्मगतिवन्न योगगतिः परिछिन्नेत्याह योगेश्वराणां त्रिलोक्या अंतश्च बहिश्च महर्लोकादिषु ब्रह्मांडाद्बहिश्च
गतिमाहुः अत्र हेतुः पवनस्यांतः आत्मा लिंगशरीरं येषामिति विद्या उपासना तपो भगवद्धर्मः योगोष्टांगः समाधिः

यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं अष्टाधिपत्ये गुणसन्निवाये सहैव गच्छेन्मनसेंद्रि
येश्च २२ योगेश्वराणां गतिमाहुरंतर्बहिस्त्रिलोक्याः पवनांतरात्मनां न कर्मभिस्तां गतिमाप्नुवंति विद्यातपो
योगसमाधिभाजां २३ वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा विधूतकल्कोथ हरे
रुदस्तात्प्रयाति चक्रं नृप शैशुमारम् २४

त्तीनं तान्ये भजंति तेषां या गतिस्तां २३ तामाह वैश्वानरमित्यष्टभिः विहायसा आकाशेन तत्र च ब्रह्मलोकपथेन
गतः सन् प्रथमं वैश्वानरं अग्न्यभिमानिनीं देवतां याति केनोपायेन सुषुम्णया नाड्या सा च देहाद्बहिरपि वित
तास्तीति आह शोचिषा ज्योतिर्मय्या विधूतः त्यक्तः कल्को मलं येन सः क्वाप्यसज्जमान इत्यर्थः उदस्तात् उप
रिष्टात् वर्तमानं हरेः संबंधि तारारूपनारायणाधिष्ठितमित्यर्थः शैशुमारं चक्रं पंचमस्कंधे वक्ष्यमाणं शिशुमाराका ८
रं ज्योतिश्चक्रं चक्रे स्थानानि आद्रादिध्रुवांतानि पदानि प्रयातीत्यर्थः २४

निरुपाधित्वं कुतस्तत्राह परमिति यद्यस्मात् तत् आत्मव्यतिरिक्तं नेति नेतीत्येवमुत्सिसृक्षवो दौरात्म्यं देहाद्यात्मत्वं वि
सृज्य अर्हस्य पूज्यस्य श्रीविष्णोः पदं पदे पदे क्षणे क्षणे हृदा उपगुह्य आश्लिष्य नान्यस्मिन् सौहृदं येषां ते यथाभूताः
संतः तद्वैष्णवं पदं अतएव परं सर्वतः श्रेष्ठमामनंतीत्यन्वयः १८ तस्मादित्थं ब्रह्मत्वेन व्यवस्थितो मुनिरुपरमेत् तु
शब्देन यदि प्रयास्यन्निति वक्ष्यमाणस्य कामाद्विशेषस्तूक्तः तमाह विज्ञायते ऽनेनेति विज्ञानं शास्त्रं तेन जाता दृक् ज्ञानं
तस्य वीर्यं बलं तेन सुरंधिता विहिंसिता आशया विषयवासना यस्य सः इदानीं तस्य देहत्यागप्रकारमाह स्वपा

परं पदं वैष्णवमामनंति यन्नेति नेतीत्यतदुत्सिसृक्षवः विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्या
र्हपदं पदे पदे १८ इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः स्वपार्ष्णिनापीड्य गुदं
ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः १९ नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नये
न्मुनिः ततोऽनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत २० तस्माद्भ्रुवोरंतरमुन्नयेत निरुद्धसप्तायतनो
ऽनपेक्षः स्थित्वा मुहूर्तार्द्धमकुंठदृष्टिर्निर्भिद्य मूर्द्धन् विसृजेत्परं गतः श्री

र्ष्णिना पादमूलेन गुदं मूलाधारमापीड्य
निरुध्य अनिलं प्राणमुन्नमयेत् ऊर्ध्वं नयेत् जितक्लमो येन षट्सु स्थानेषु नाभ्यादिषु १९ नाभ्यां मणिपूरके स्थितं हृदि अ
नाहतचक्रे अधिरोप्य उरसि कंठाद् अधोदेशे स्थिते विशुद्धिचक्रे मनस्वी जितचित्तः स्वतालुमूलं तस्यैव चक्रस्याग्रदेशं ततो
वङ्धागमनसंभवात् शनकैरित्युक्तं २० तस्माद्भ्रुवोरंतरं आज्ञाचक्रे निरुद्धानि श्रोत्रे नेत्रे नासिके मुखं चेत्येवं सप्तायत
नानि प्राणमार्गा येन सः अनपेक्षश्चेत्परं ब्रह्मगतः सन् मूर्द्धनि ब्रह्मरंध्रे निर्भिद्य देहमिंद्रियाणि च विसृजेत् २१ ॥ ३३ ॥

तत्रब्रह्मलोकंगतानांत्रिविधागतिः येपुण्योत्कर्षेणगताःतेकल्पांतरेपुण्यतारतम्येनाधिकारिकाभवंतियेतु
हिरण्यगर्भाद्युपासनाबलेनगतास्तेब्रह्मणासहमुच्यंते येतुभगवदुपासकास्तेस्वेछयाब्रह्मांडंभित्वावैस्णव
पदंआरोहंति तत्रप्रस्तुतस्यभगवद्भक्तस्यब्रह्मांडभेदनप्रकारमाह ततइत्यादिना तत्रेयंप्रक्रियाईश्वराधि
ष्ठितायाःप्रकृतेःकेनचिदंशेनमहत्तत्वंभवति तस्यांशेनाहंकारः तस्यांशेनशब्दतन्मात्रद्वारानभः तस्यांशे
नस्पर्शतन्मात्रद्वारावायुः तस्यांशेनरूपतन्मात्रद्वारातेजः तस्यांशेनरसतन्मात्रद्वाराआपः तदंशेनगंधतन्मा
त्रद्वारापृथ्वीतैश्चमिलितैश्चतुर्दशभुवनात्मकंविराट्शरीरं तस्यचपंचाशत्कोटियोजनविशालस्यपृथिव्ये

ततोविशेषंप्रतिपद्यनिर्भयस्तेनात्मनापोनलमूर्तिरत्वरन् ज्योतिर्मयोवायुमुपेत्यकालेवाय्वात्म
नाखंबृहदात्मलिंगं २८

थांडकटाहविशेषशब्दवाच्याःकोटियोजनविशालंप्रथमावरणंपंचाशत्कोटियोजनविशालमित्येके तत
श्चापआदीनांयेपरिणतांशास्तान्येवोत्तरोत्तरंदशगुणान्यावरणानि अष्टमंतुप्रकृत्यावरणंव्यापकमेवंतदे
वंस्थितेपृथिव्याद्यावरणभेदप्रकारःकथ्यते ततोविशेषंप्रतिपद्यलिंगदेहेनपृथिव्यात्मतांप्राप्येत्यर्थः ए
वमुत्तरत्रापिद्रष्टव्यं निर्भयःकथंयास्यामीतिशंकाशून्यः तेनात्मनापृथिवीरूपेणतन्निरंतरंआपःप्रतिपद्य
अत्वरन्त्वरामकुर्वन् तत्तदात्मत्वेनक्लेददाहादिशंकाभावाद्यथेष्टंभोगान्भुंजानइत्यर्थः एवंज्योतिर्मयःसन्
कालेभोग्यावसानेचवृहत्आत्मनोलिंगंपरमात्ममूर्त्तित्वेनोपासनेसूक्ष्मंयद्वावेदशब्दात्ममूर्त्तिनातस्यप्रमापकमिति २८ ९

तद्विस्नोअंशकं विस्वस्यनाभिंसर्व्वाधारभूतं आविष्टलिंगत्वात् नाभिशब्दस्यनपुंसकत्वं अतिवर्त्यअतिक्रम्यपरतः
सर्व्वैरेवगात्यभावादेकएवविनिर्म्मलेनलिंगशरीरेणब्रह्मविदांस्थानं अन्यैर्नमस्कृतंमहर्लोकमुपैति यद्यस्मि
न्विबुधामश्रकल्पायुषोभृग्वादयः २५ अथोअनंतरं कल्पांतेसविश्वंत्रैलोक्यमतिशयेनदह्यमानंनिरीक्ष्य
तत्रापूष्मप्राप्तेःयद्द्विपरार्द्धस्थायितत्पारमेष्ठ्यंपदंप्रतिनिर्यातिसिद्धेश्वरैर्जुष्टानिधिस्न्यानिविमानानि

तद्विश्वनाभिंत्वतिवर्त्यविस्नोरणीयसाविरजेनात्मनैकः नमस्कृतंब्रह्मविदामुपैतिकल्पा
युषोयद्विबुधारमंत्ते २५ अथोअनंतस्यमुखानलेनदंदह्यमानंसनिरीक्ष्यविश्वंनिर्यातिसिद्धे
श्वरजुष्टधिस्न्यंयद्द्वैपरार्द्ध्यंतदुपारमेष्ठ्यं २६ नयत्रशोकोनजरानमृत्युर्नार्त्तिर्नचोद्वेगऋ
तेकुतश्चित् यच्चित्ततोदःकृपयानिदंविदांदुरंतदुःखप्रभवानुदर्शनात् २७ रामराम

यस्मिन्तत उ इतिश्रेष्ठंसूचितम् २६ तदेवाहनयत्रेति आर्त्तिर्दुःखं उद्वेगोभयंकिंतुचित्ततोहेत्तोर्यत्दु
खंअदःस्तेतदेकंविनातत्कुतोभवति अनिदंविदां इदंभगवतोध्यानमजानतांप्राणिनांदुरंतदुः
खायःप्रभवोजन्मतस्यानुदर्शनात्तेषांकृपयामहच्चित्ततोदोमनःपीडेतियत् तद्विनाकुतश्चिदपि
यत्रशोकादयोनसंतीति २७

सृतीमार्गौप्रकारावित्यर्थः हेनृप अनपेक्षोनिर्भिद्यमूर्द्धन विसृजेत् परंगतइतियासद्योमुक्तिः एकासृतिः यदि
प्रयास्यन्नित्यादिनाक्रममुक्तिश्चद्वितीयासृतिः एतेसृतीवेदेनगीतेउक्ते नतुस्वोत्प्रेक्षिते तत्रयदासर्वेप्रमुच्यंते
कामायेऽस्यहृदिस्थिताः अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुते इतिसद्योमुक्तिः तेऽर्चिषंअभिसंभवंतीत्यादि
नाक्रममुक्तिश्चवेदेनोक्ता यद्वा नकर्मभिस्तांगतिमाप्नुवंति इतिदर्शितएवमार्गस्यापिस्वचिंतितत्वादेतेसृती इति
द्विवचनं त्वयाभिपृष्टेयच्छ्रोतव्यमित्यादिप्रश्नेनार्थान्मुक्तिविषयेहे अपिसृतीपृष्टेब्रूहियद्वाविपर्ययेयमि

एतेसृतीतेनृपवेदगीतेत्वयाभिपृष्टेहसनातनेच येवैपुराब्रह्मणआहतुष्टआराधितोभगवा
न्वासुदेवः ३२ नह्यतोन्यःशिवःपंथाविशतःसंसृताविह वासुदेवेभगवतिभक्तियोगोयतोभवेत्
३३ भगवान्ब्रह्मकार्त्स्न्येनत्रिरन्वीक्ष्यमनीषया तदध्यवस्यत्कूटस्थोरतिरात्मन्यतोभवेत् ३४

त्विदंदर्शितएवमार्गोप्यथोक्तः एवंत्वयाचयेपृष्टेएतेसृतीत्यन्वयः ३२ संतिसंसरतःपुंसोबहवोमोक्षमार्गाः
तपोयोगादयःसमीचीनस्त्वयमेवेत्याह नहीति यतोनुष्ठिताद्भक्तियोगोभवेत् अतोऽन्यःशिवःसुखरूपोनिर्वि
घ्नश्चनास्त्येव ३३ कुतएतदतआह भगवान्ब्रह्माकूटस्थःनिर्विकारःएकाग्रचित्तःसन्नित्यर्थः त्रिस्त्रीन्
वारान्कार्त्स्न्येनसाकल्येनब्रह्मवेदंअन्वीक्ष्यविचार्ययतआत्मनिहरौरतिर्भवेत् तदेवमनीषयाऽध्यवस्य

त्स्न्ये

इंद्रियार्थानां भूतसूक्ष्माणामतिक्रममाह घ्राणेनाधिष्ठितेन गंधमुपेत्य श्वसनं स्पर्शं नभोगुणत्वं शब्दात्मता प्राणेन
तत्तत्कर्मेंद्रियेण आकूतिं तत्तत्क्रियां २९ तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहंकारप्राप्त्या मह
दादिप्राप्तिमाह स योगी विकार्यं संसाद्य विज्ञानतत्वं याति विविधं कार्यमस्येति विकार्योऽहंकारः स त्रिविधः
तामसो राजसः सात्विक इति तत्र तामसाज्जडानि भूतसूक्ष्माणि जायंते राजसाद्बहिर्मुखानि दशेंद्रियाणि सात्विका

घ्राणेन गंधं रसनेन वै रसं रूपं च दृष्ट्या श्वसनं त्वचैव श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमु
क२ पैति योगी २९ स भूतसूक्ष्मेंद्रियसंनिकर्षं मनोमयं देवमयं विकार्यं संसाद्य गत्या सह तेन याति
विज्ञानतत्वं गुणसंनिरोधं ३० तेनात्मनात्मानमुपैति शांतमानंदमानंदमयोऽवसाने एतां ग
तिं भागवतीं गतो यः स वै पुनर्नेह विसज्जतेऽंग ३१

न्मन इंद्रियदेवाश्च तेषां लयस्थानं तत्तदहंकारे तत्र
भूतसूक्ष्माणामिंद्रियाणां च सन्निकर्षो लयस्थानं तामसं राजसं च मनोमयं देवमयं च सात्विकं प्राप्य
गत्या एवं गमनेन तेनाहंकारेण सह विज्ञानतत्वं महत्तत्वं याति ततो गुणानां सन्निरोधो लयो यस्मिंस्तत्
प्रधानं याति ३० तेनात्मना प्रधानरूपेणानंदमयः सन् उपाधिनामवसाने शांतमविकृतमानंदं परमा
नमुपैति न विषज्जते नावर्तते इत्यर्थः ३१

ब्रह्मणस्पतिं वेदपतिं ब्रह्माणं इंद्रियपाटवकामस्त्विंद्रं प्रजापतीन् दक्षादीन् २ मायां दुर्गां विभावसुं अग्निं वसु
कामः धनार्थी वीर्यं प्रभावः तत्कामो वीर्यवान् सन् रुद्रान् यजेत् ३ अन्नाद्यं भोज्यं भक्ष्यं च अदितेः सुतान् द्वादशादित्या
न् विशां देशस्य प्रजानां स्वाधीनतामिच्छन् साध्यान् यजेत ४ इलां पृथ्वीं प्रतिष्ठा स्थानादप्रच्युतिः रोदसी द्यावाभूमी

ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिं इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन् २ देवीं मायां तु श्री
कामस्तेजस्कामो विभावसुं वसुकामो वसून् रुद्रान् वीर्यकामोथ वीर्यवान् ३ अन्नाद्यकामस्त्वदितिं स्वर्गकामो
ऽदितेः सुतान् विश्वान् देवान् राज्यकामः साध्यान् संसाधको विशाम् ४ आयुष्कामोऽश्विनौ देवौ पुष्टिकाम इ
लां यजेत् प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ५ रूपाभिकामो गंधर्वान् स्त्रीकामोऽप्सरउर्वशीं आधिपत्य
कामः सर्वेषां यजेत परमेष्ठिनं ६ यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं विद्याकामस्तु गिरिशं दांपत्यार्थ उमां
सतीम् ७ धर्मार्थ उत्तमश्लोकं तंतुं तन्वन् पितॄन् यजेत् रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ८

५ अप्सराश्चासौ उर्वशी च तां ६ यज्ञं यज्ञोपाधिं विष्णुं कोशो वस्तुसंचयः वसुकाम इत्यत्र धनमात्रमिति
भेदः दांपत्यमन्योन्यप्रीतिः तदेवार्थो यस्यासः ७ धर्मार्थः धर्मकामः उत्तमश्लोकोपाधिं विष्णुं तंतुं तन्वन् संतान
वृद्धिमन्विच्छन् रक्षा बाधानिवृत्तिः तत्कामः पुण्यजनान् यक्षान् ओजो बलं तत्कामः मरुद्गणान् देवान् ८ ॥ ११

ननु भूतेष्वर्थे रतिर्भवति न त्वननुभूते तु भगवति कथं रतिः स्यात्तत्राह भगवानलक्षितं दृष्टः कथं स्वात्मना द्रष्ट्रत्वेन ज्ञात ८
मित्यर्थः कैर्दृश्यैर्बुद्ध्यादिभिः तदेव दर्शयति दृश्यानां जडानां बुद्ध्यादीनां दर्शनं स्वप्रकाशं द्रष्टारं विना न
घटत इत्यनुपपत्तिमुखेन लक्षणैः स्वप्रकाशत्वव्याप्तिलक्षकैः तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वाद्वास्या
दिवदिति व्याप्तिमुखेनानुमापकैः स्वतंत्रश्च कर्तेत्येवमीश्वरसिद्धिः ३५ यच्छ्रोतव्यमित्यादि प्रश्नोत्तरमुप
संहरति तस्मादिति ३६ श्रवणादिफलमभिनयेनाह पिबंतीति सतां आत्मनः आत्मत्वेन प्रकाशमानस्य कथे

भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ३५ तस्मात्सर्वा
त्मना राजन्हरिः सर्वत्र सर्वदा श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणां ३६ पिबंति ये भगवत
आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरो
रुहांतिकं ३७ ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कंधे महापुरुषसंस्थायोगस्मृती
चवर्णनं द्वितीयोध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ एवमेतन्निगदितं पृष्टवान्यद्भवान्मम नृणां यन्म्रियमाणानां
मनुष्येषु मनीषिणां १

वामृतं विषयैर्विदूषितं मलिनीकृतं आशयं पुनंति शोधयंति तस्य चरणपद्मांति
कं श्रीविष्णुपदं व्रजंति ३७ ॥ इति द्वितीये द्वितीयः ॥ २ ॥ तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं स्फुटतो मुनेः भक्त्युद्रेकेण तत्कर्मश्रवणा
दर्शयति इदानीमन्यदेवताभजनस्यापि पुत्रादिभजनवदेकैकतुच्छफलत्वेनेहेयत्वं वक्तुं पूर्वोक्तमनुवदति एवमिति म
मेति मां कस्यचिद्दैवयोगेन मनुष्यत्वप्राप्तिं पुंजीवेषु ये मनीषिणस्तेषां तत्रापि ये म्रियमाणास्तेषां विशेषत एव मेतद्धरि

भा० द्वि० २२ श्रवणेच्छायां हेतुः हरिकथा एव उदर्के उत्तरफलं यासु ताः कथाः सतां भागवतानां सदसि सभायां स्युः १४ एत
त्प्रपंचयति स वा इति द्वाभ्यां कृष्णक्रीडादिरूपां क्रीडां यः स्वीकृतवान् १५ उरुगायस्य गुणैरुदाराः महत्यः
कथाः स्युः १६ किं च रवेर्वर्त्तीयमाणमायुर्हरिकथया सफलं कुर्वित्याशयेनाह त्रिभिः आयुरिति असौ सू
र्य उद्यन् उद्गच्छन् अस्तं अदर्शनं च यन् गच्छन् यत्क्षणेन क्षणो नीतः न स्यात्रायुः ऋते वर्जयित्वा वृथैव हर

एतच्छुश्रूषतां विद्वन्सूत नोर्हसि भाषितुं कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवं १४ स वै
भागवतो राजा पांडवेयो महारथः बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे १५ वैयासकिश्च
रामः भगवान्वासुदेवपरायणः उरुगायगुणोदाराः सतां स्युर्हि समागमे १६ आयुर्हरति वै पुंसामुद्यन्न
स्तं च यन्नसौ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्त्तया १७ तरवः किं न जीवंति भस्त्राः किं न श्वसंत्यु
त न खादंति न मेहंति किं ग्रामपशवोऽपरे १८ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः न यत्कर्णपथो
पेतो जातु नाम गदाग्रजः १९

ति १७ ननु जीवनमेव तेषामायुषः फलमस्ति तत्राह तरव इति ननु तेषां श्वासो नास्ति तेहि भस्त्राश्चर्मकोशास्तु ननु
तासामाहारादिकं नास्ति तत्राह न खादंति नाश्नंति न मेहंति रेतःसेकं न कुर्वंति मैथुनं न कुर्वन्ति किं तु तापितमपि न
राकारं पशुं मत्वाह अपर इति १८ तदेवाह श्वादिभिः संस्तुतः सह श्रेणि निरूपितो यस्य कर्णपथं कदाचिदपि नागतः
सोवश्यो पशुत्वात् श्वादिभिः कश्मलविषयासक्तत्वात् विड्वराहैर्ग्रामसूकरैः कंटकवद्दुःखदविषयासक्तत्वादुष्ट्रैः भार १२

राज्यंराज्ञ्यंवा न कामो मनून् देवान् मन्वंतरपालान् राज्ञः कर्म राज्यं तत्कामो विष्णून् देवानिति विशेषः अभिचरन् शत्रुमर
णमिच्छन् निर्ऋतिं राक्षसं कामकामः भोगेच्छुः अकामः वैराग्यकामः पुरुषं परं प्रकृतिव्यतिरेकोपाधिमीश्वरं ९ अकामः ए
कांतभक्तः उक्तानुक्तसर्वकामो वा पुरुषं पूर्णं निरुपाधिं १० पूर्वोक्तनानादेवतायजनस्यापि सयोगं पृथक्कृत्तेनभ
क्तियोगफलत्वमाह एतावानिति इंद्रादीनपि यजतांइह तत्तद्यजने भागवतानांसंगतो भगवत्यचलो भावो भक्तिर्भवतीति यत ए
तावानेव निःश्रेयसस्य परमपुरुषार्थस्योदयो लाभः अन्यत्तु सर्वं तुच्छमित्यर्थः ११ भागवतसंगत इत्यनेन सूचितां हरि

राज्यकामो मनून्देवान्निर्ऋतिं त्वभिचरन्यजेत् कामकामो यजेत्सोमं अकामः पुरुषं परं ९ अकामः सर्वका
मो वा मोक्षकाम उदारधीः तीव्रेण भक्तियोगेन यजेत पुरुषं परं १० एतावानेव यजतामिह निःश्रेयसोद
यः भगवत्यचलो भावो यद्भागवतसंगतः ११ ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणे
ष्वसंगः कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् १२ शौनक उवाच
इत्यभिव्याहृतं राजा निशम्य भरतर्षभः किमन्यत्पृष्टवान्भूयो वैयासकिमृषिं कविं १३

कथारतिं स्तौति ज्ञानमिति यत्र यासु कथासु ज्ञानं भवति कीदृशं आसर्वतः प्रतिनिवृत्तं उपरतं गुणोर्मीणां रागा
दीनां चक्रं समूहो यस्मात्तत् उत अनंतरं तद्धेतुरात्मप्रसादश्च यत्र यासु मनःप्रसादहेतुः गुणेषु विषयेष्वसंगो वैरा
ग्यं च उभयत्रेति पाठे इहामुत्र च गुणेष्वसंगः कैवल्यमित्येव संमतः पंथा यो भक्तियोगः निर्वृतः श्रवणसुखेन अन्य
त्रानिर्वृतः रतिं वा तासु हरिकथासु को रतिं न कुर्यात् १२ अभिव्याहृतं उक्तं ऋषिं परब्रह्मदर्शिनं कविं शब्दब्रह्मनि

तुर्थेपरीक्षिताप्रश्ने सृष्ट्यादिहरिचेष्टितं शुकेनब्रह्मतत्पुत्रसंवादेनोपवर्ण्यते राज्ञः प्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमा
ह चतुर्भिः वैयासकेः शुकस्य इत्येवंभूतमात्मनस्तत्त्वस्य निश्चयो यस्मात्तद्वचः उपधार्य्य औत्तरेयः सतीं कृतस एवंत
थोनान्यः इत्येवंभूतां १ आत्मा देहः पशवो गजादयः २ इममेवार्थं हरिलीलालक्षणं ३ संस्थां मृत्युं त्रैवर्गिकं धर्मार्थ

सूत उवाच ॥ वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः उपधार्य्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् १ आत्मजाया
सुतागारपशुद्रविणबंधुषु राज्ये चाविकले नित्यं विरूढां ममतां जहौ २ पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्त
माः कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ३ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् वासुदेवे भगवति
आत्मभावं दृढं गतः ४ ॥ राजोवाच ॥ समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ तमो विशीर्य्यते मह्यं हरेः कथय
तः कथां ५ भूय एव विवित्सामि भगवानात्ममायया यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ६ यथा
गोपायति विभुर्यथा संयच्छते पुनः यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् आत्मानं क्रीडयन् क्रीडन्
करोति विकरोति च ७ नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितं ८

कामप्रधानं संन्यस्य त्यक्त्वा आत्मभावं परमप्रेमाणं भगवदात्मत्वं गतः प्राप्तः सन् पप्रच्छ ४ मह्यं मम तमोऽज्ञा
नं नश्यति तव कथयतः सतोऽतः समीचीनं ५ पुनश्च वेदितुमिच्छामीदं दुर्विभाव्यमविनिर्वर्णं विश्वं यथा सृजति
६ गोपायति पालयति संयच्छते संहरते पुरुशक्तिश्चेत् शक्तिमान् क्रीडन् यथा करोत्यात्मानं ब्रह्मादिरूपेण क्री
डयन् विकरोति विविधं करोति ८

न्नस्यांगानि च निस्फलानीत्याह विलेइति पंचभिः वतेति खेदे नश्रृण्वतो श्रृण्वतो नरस्य ये कर्णपुटे ते विले वृथारंध्रे न चेदुरुगा
यति तस्य जिह्वा ऽसती दुष्टा दर्दुरो मेकस्तदीया जिह्वेव २० पट्टवस्त्रोष्णीषेण किरीटेन च वेष्टमपि शिरो यदि न नमेत्
तर्हि केवलं भार एव शवो मृतकस्तत्करतुल्यौ लसंती कांचनकंकणे ययोस्तौ अपि पर्थैवा शवः २१ ये नयने विष्णोर्मू

बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगा
थाः २० भारः परं पट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुंदं शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्कांचनकंक
णौ वा २१ वर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानु
व्रजतो हरेर्यौ २२ जीवंछवो भागवतांघ्रिरेणुं न जातु मर्त्योभिलभेत यस्तु श्रीविष्णुपद्या मनुजस्तुलस्याः
श्वसंछवो यस्तु न वेद गंधं २३ तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः न विक्रियेताथ यदा
विकारो नेत्रे जलं गात्ररुहेषु हर्षः २४ अथाभिधेह्यंग मनोनुकूलं प्रभाषसे भागवतप्रधानः यदाह
वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः २५ ॥इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे तृती
योध्यायः॥३॥

र्तीर्न निरीक्षेते ते नेत्रे वर्हायिते मयूरपुच्छतुल्ये द्रुमवज्जन्मभाजौ ते तिनधावृत्तमूलतुल्यावित्यर्थः २२ नाभिलभे
त अभितो न स्पर्शेन न धारयेत् श्रीविष्णुपदलग्नाया न वेदेति अवघ्राय नाभिनंदेदित्यर्थः २३ अश्मवत्
सारं वलं काठिन्यं यस्य विक्रियालक्षणमाह अथेति गात्ररुहेषु रोमसु हर्षः उद्गमः २४ यस्मादभक्तस्य सर्वमि
दं व्यर्थं मनसोनुकूलं च प्रियं ब्रूषे अथातः साधु पृष्टः सन् वैयासकिर्नृपतिं प्रतियदाह तदभिधेहीति २५

भा० द्वि० सात्वतां भक्तानामृषभाय पालकाय कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिशापि यस्य दुर्ज्ञेयायेत्यर्थः तदेवं वैष
२४ म्यप्रतीतावपि निर्दोषित्वायाचिंत्यमैश्वर्यमाह निरस्तसाम्यमतिशयश्च यस्य येनापेक्षयान्यस्य साम्यमतिशयश्च ना
स्तीति तेन राधसैश्वर्येण स्वधाम्नि स्वस्वरूपे ब्रह्मणि रममाणाय १४ सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन्स्तुवन्नमति यत्की
र्तनमिति द्वाभ्यां अर्हणं पूजनं सुभद्रं सुमंगलं श्रवो यशो यस्य तस्मै १५ विचक्षणा विवेकिनो यस्य चरणयोरुपसादनादु

नमो नमस्तेस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्म
णि रंस्यते नमः १४ यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं लोकस्य सद्यो विधुनोति क
ल्मषं तस्मै सुभद्रश्रवसे नमो नमः १५ विचक्षणा यच्चरणोपसादनात्संगं व्युदस्योभयतोंतरात्मनः विंद
ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः १६ तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रवि
दः सुमंगलाः क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः १७ किरातहूणांध्रपुलिं
त१ दपुल्कसा आभीरकंका यवनाः खसादयः येन्ये च पापा यदुपाश्रयाश्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः १८

प्रसत्तेर्भजनादंतरात्मनो मनसः उभयतः इह च परत्र च संगं व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः १६ भक्तिमू
न्यानां सर्वसाधनवैफल्यं दर्शयन्नमति तपस्विन इति मनस्विनो योगिनः सुमंगलाः सदाचाराः यस्मिंस्तपश्री
दर्पणं विना सुभद्रश्रवस इत्यस्यावृत्तिर्यन्नाः श्रवणादेः प्राधान्यज्ञापनाय १७ भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नमा
ह किरातादयो ये पापजातयः अन्ये च ये कर्मतः पापरूपास्ते यदुपाश्रयाः भागवताः तदाश्रयाः संतः शुध्यंत्यसंभा

एकः पुरुषरूपेणानुगपक्षजन्मभिः ब्रह्माद्यवतारैः क्रमशो वा युगपद्वा प्रकृतेर्गुणान्गृह्णाति ९ विचिकित्सितं संदिग्धं शाब्दे ब्रह्म
णि विचारेण निस्नातः परस्मिन्ननुभवेन १० उपामंत्रितः प्रार्थितः प्रचक्रमे देवतागुरुनमस्कारादिरूपमुपक्रमं
कृतवानित्यर्थः ११ तदेवाह त्रयोदशभिः परस्मै सर्वोत्तमाय तत्र हेतुः भूयसेऽपरिमितमहिम्ने तद्दर्शयति सतः प्रपंच
स्योद्भवादिषु निमित्तभूतया लीलया गृहीतं ब्रह्मादिरूपेण सृजत्र्यादिशक्तित्रितयं येन तस्मै अंतर्भवायांतर्यामि

यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोपि वा विभर्त्ति भूरिशस्त्वेकः कुर्वन्कर्माणि जन्मभिः ॥९॥ विचिकित्सित
मेतन्मे ब्रवीतु भगवान्यथा शाब्दे ब्रह्मणि निस्नातः परस्मिंश्च भवान्खलु १० **॥सूत उवाच॥** इत्युपामंत्रि ग२
तो राज्ञा गुणानुकथने हरेः हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ११ **॥श्रीशुक उवाच॥** नमः परस्मै
पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया गृहीतशक्तित्रितयाय देहिनामंतर्भवायानुपलक्ष्य
वर्त्मने १२ भूयो नमः सद्वृजिनच्छिदे ऽसतामसंभवायाखिलसत्वमूर्त्तये पुंसां पुनः पारमहंस्य आश्र
मे व्यवस्थितानामनुमृग्यदाशुषे १३

णे यत एव सर्वांतरत्वात् अनुपलक्ष्यं वर्त्म यस्य १२ विचित्रफलदातृत्वमनुस्मरन्प्रणमति भूयः पुनश्च नमः
सतां धर्मवर्त्तिनां वृजिनच्छिदे दुःखहंत्रे असतामधर्मशीलानामसंभवाय अनुद्भवहेतवे अखिलसत्वमूर्त्तये तत्तद्दे
वादिरूपेण तत्तत्फलदायेत्यर्थः समग्रसत्वमूर्त्तये इति वा पुनरपि सर्वोत्कर्षं भववैलक्षण्यमाह पारमहंस्ये प्र
त्यङ्निष्ठारूपे आश्रमे व्यवस्थितानां पुंसामनुमृग्यमतन्निरसनेन पुनः पुनर्मृग्यं पदमात्मतत्वं तस्मै दाशुषे दत्त
वते १३

भा०द्वि०
१५

इदानीं स वाच्यं श्रोतृजनाह्लादिनीं शृंगारकरुणादिशोभां प्रार्थयते भक्तैरिति समेव वांसि अस्मत्कपीशालंकारस्त्वन्य
स्य वचसामन्येनालंकारसंभवमाशंक्य तत्स्यांतर्यामिनो माविष्करोतियामहद्भिर्भूतैरिमाःपुरःशरीराणि सृष्ट्वा
नुपुर्षुवितर्यामितया शेते वसति अत्र पुरुषस्तमाख्या प्रमाणयति यद्यस्मात्पुरुषइति अतएव यएकादशेन्द्रियपंच
भूतरूपान् षोडशगुणान्कलाः भुंक्ते प्रकाशयति पालयतीति वा तदात्वात्मनं पदमाधमत्रहेतुर्यतः षोडशनामा
त्मा चेतयितास्त्वार्थकः नत्वत्र जीवत्वमुच्यते प्रार्थनाविरोधात् २३ श्रीव्यासं नमस्करोति सौम्या भक्ताः यस्य मु

भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः भुंक्ते गुणान्षोडश षोडशात्मकः सोऽलंकृ
षीष्ट भगवान्वचांसि मे २३ नमस्तस्मै भगवते वासुदेवाय वेधसे । पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहास
वं २४ एतदेवात्मभू राजन्नारदाय विपृच्छते वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः २५ ॥ इतिश्रीमद्भा
गवते महापुराणे द्वितीयस्कंधे महापुरुषसंस्थानुवर्णने चतुर्थोऽध्यायः ॥ ४ ॥ श्रीनारद उवाच ॥ देवदेव न
मस्तेऽस्तु भूतभावन पूर्वज तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम् १

खाम्बुरुहे आसवो मकरंदस्तं २४ इदानीं प्रश्नस्योत्तरतया ब्रह्मनारदसंवादं प्रस्तौति एतदिति उत्पत्तिसमय एव वे
दगर्भो यस्य साक्षाद्धरिर्यदाह २५ ॥ इति द्वितीये चतुर्थः ॥ ४ ॥ पंचमे नारदेनाथ पृष्टः स्रष्ट्रादिवेत्त्यजः हरिलीलां वि
राट्सृष्टिं कालकर्मादिशक्तिभिः नारदाय विपृच्छते वेदगर्भोऽभ्यधादित्युक्तं तत्र नारदप्रश्नमाह देवदेवेति हे भू
तभावन अत एव सर्वेषां पूर्वज अनादे ज्ञायतेऽनेनेति ज्ञानं तत्साधनं यत्तद्विजानीहि विशेषेणाववोधयेत्यर्थः क १५

सर्वोपास्यत्वमनुस्मरन् प्रार्थयते स एष आत्मवतां धीराणामात्मात्मत्वेनोपास्य इत्यर्थः त्रयीमयत्वादिविशेष
णैस्तत्तन्मार्गेणोपास्यत्वं विवक्षितं गतव्यलिकैर्निष्कपटैर्भक्तैर्वितर्क्यमत्याश्चर्य्यं वीक्ष एवं लिंगं मूर्तिर्यस्य स मे
प्रसीदतु १९ सर्वपालकत्वमनुस्मरन्नाह श्रिय इति गतिश्चाश्रयः सर्वोपस्कारकः २० न प्रदत्वमनुस्मरन्नाह द्वाभ्याम्

स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः गतव्यलीकैरजशंकरादिभिर्वितर्क्य
लिंगो भगवान्प्रसीदतां १९ श्रियःपतिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः पतिर्गतिश्चां
धकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतांपतिः २० यदंघ्र्यनुध्यानसमाधिधौतया धियानुपश्यति
हि तत्वमात्मनः वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान् प्रसीदतां २१ प्रचोदिता येन पुरा
सरस्वती वितन्वताजस्य सती स्मृतिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतां २२

यस्यांघ्रोरनुध्यानमेव समाधिस्तेन धौतया शोधितया यथारुचं रुच्यनुसारेण सगुणनिर्गुणादिभेदैः यद्वा रुच
प्रतिभा यथा मतीत्यर्थः २१ किंच पुराकल्पादावजस्य हृदि सतीं सृष्टिविषयां स्मृतिं वितन्वता येन प्रचोदिता सती स
रस्वती तस्य मुखतः किल प्रादुर्भूता स्वानि लक्षणानि शिक्षायुक्तानि यस्याः सा ऋषीणां ज्ञानप्रदानामृषभः श्रेष्ठः २२

स तथाविधोऽपि भवांस्तपोऽचरदिति यत् तेन नोऽस्मान् खेदयसे मोहयसि यतः पराशंकामीश्वरांतरशंकां प्रयच्छसि
७ यथैवाहं त्वयानुशासितः शिक्षितः सन् बुध्येय तथापि विशेषेण ज्ञापय ८ प्रश्नमभिनंदति हे वत्स पुत्र तवेदं विचि
कित्सितं संदेहः तत्र सर्वकः प्रश्नोऽयं सम्यगित्यर्थः यतः कारुणिकस्य तवायं प्रश्नोऽत्र हेतुः यत् यतः परमधर्मे भगवद्
वीर्यप्रकाशने प्रवर्तितोऽस्म्यनेन त्वं जिज्ञासुरपि मत्स्थितिरूपमेव कृतवानित्यर्थः ९ ननु त्वमेव भगवानित्युक्तं त्वये
कः सृजसि भूतानीत्यादिना सत्यं तथा मामीश्वरत्वेन प्रभाषसे तदपि तव भाषणं नात्यंतमनृतं यतः कारणादेतावत्त्वं

स भवानचरद्घोरं यत्तपः सुसमाहितः तेन खेदयसे नस्त्वं पराशंकां प्रयच्छसि ७ एतन्मे पृच्छतः सर्वं सर्वज्ञ
सकलेश्वर विजानीहि यथैवेदमहं बुध्येऽनुशासितः ८ ॥ब्रह्मोवाच॥ सम्यक्कारुणिकस्येदं वत्स ते विचिकि
त्सितं यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ९ नानृतं तव तच्चापि यथा मां प्रब्रवीषि भोः अविज्ञाय परं मत्त
एतावत्त्वं यतो हि मे १० येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ११

भावस्य भाव एतावत्त्वं मेऽस्ति किंतु मत्तः परमीश्वरमविज्ञाय ब्रूषे अतः सादृश्यात्तवेयं भ्रांतिः न तु बुद्धिपूर्वमनृतमित्यर्थः
यतः ईश्वरान्मम एतावत्त्वं न मविज्ञायेति वान्वयः १० नहि कोऽसावीश्वर इत्यपेक्षायां भक्त्या नमस्कुर्वन्नेव तं कथयति त्रि
भिः येन स्वप्रकाशेन रोचितं प्रकाशितमेव प्रकाशयामि सृष्ट्याभिव्यक्तं करोमि यथार्कादयश्चैतन्यप्रकाश्यमेव प्रका
शयंति तथा च श्रुतिः न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः तमेव भांतमनुभाति सर्वमिदं
विभातीति ११

उपलक्षणभूतं तु विश्वमेवात्मज्ञानसाधनमतस्तद्विशेषं पृच्छति यद्रूपं येन रूप्यते प्रकाश्यते यदधिष्ठानं यदाश्रयं यतो येन स्र
ष्टं यत्संस्थं यस्मिंल्लीयते यत्परं यदधीनं यच्चेति यदात्मकं स्वतः साकारणतो वेत्यर्थः तस्य तत्त्वं याथार्थ्यं तत्त्वतो वद २ ननु
नामीति न च वक्तव्यमित्याह सर्वमिति भूतं जातं भव्यं जनिष्यमाणं भवज्जायमानं तेषां प्रभुर्यतोऽतः विशिष्टेन ज्ञानेनाव
सितं निश्चितं ३ आस्तामिदं मादृशेन वक्तव्यमेव कथयेत्याह यद्विज्ञानो विज्ञानं यस्य कस्तव विज्ञानद इत्यर्थः यदाधारः कस्त
वाश्रयः यत्परः यदधीनः यदात्मकः यत्स्वरूपः मम तु त्वमेव स्वतन्त्रः परमेश्वर इति बुद्धिस्तव तपश्चरणेन तु परबुद्धिं कया

यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः २ सर्वं ह्येतद्भवान्वेद भूतभव्यभ
वत्प्रभुः करामलकवद्विश्वं विज्ञानावसितं तव ३ यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः एकः सृजसि
भूतानि भूतैरेवात्ममायया ४ आत्मन्भावयसे तानि न पराभावयन्स्वयं. आत्मशक्तिमवष्टभ्य ऊर्णनाभिरि
वाक्रमः ५ नाहं वेद परं ह्यस्मिन्नापरं न समं विभो नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ६

पृच्छामीत्याह सार्द्धैश्चतुर्भिरेकोऽसहायः ४ आत्मनि भावयसे पालयसि स्वयमेव पराभवमप्राप्नुवन्नक्रमः श्रमर
हितः यथोर्णनाभिरात्मन एव शक्तिमवष्टभ्य सृजति तद्वत् ५ तस्मादहं त्वस्मिन्विश्वस्मिन् परमुत्तममपरमधमं
समं मध्यमं च तत्रापि नाम मनुष्यादिरूपं द्विपदत्वादि गुणान् शुक्लत्वादि तैर्भाव्यं साध्यं तत्रापि सदसत् स्थूल
सूक्ष्मं च किंचिदप्यन्यतो न वेद किंतु त्वत्त एव सर्वं भवतीति मन्ये ६

तर्हि किं करोमीत्यपेक्षायामाह तस्य सृज्यमपि तेन सृष्टोहं सृजामि ईक्षया कटाक्षेण तत्र हेतवः द्रष्टुरित्यादयः १७ ननु
कुतोयं जीवेश्वरविभागः यतस्त्वं प्रेर्यः स च प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह सत्वमिति त्रिभिः निर्गुण
स्यापीश्वरस्यैते त्रयो गुणा एव बध्नंतीत्युत्तरेणान्वयः कथंभूतास्ते तेनैव स्वात्मन्येव स्थित्याद्यर्थं मायया गृहीताः १८
वस्तुतः सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्नंति कार्यमधिभूतं कारणमध्यात्मं कर्त्ताधिदैवं ते

तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः सृज्यं सृजामि सृष्टोहमीक्षयैवाभिचोदितः १७ सत्वं र
जस्तम इति निर्गुणस्य गुणास्त्रयः स्थितिसर्गनिरोधेषु गृहीता मायया विभोः १८ कार्यकारणकर्तृ
त्वे द्रव्यज्ञानक्रियाश्रयाः बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः १९ स एष भगवाँल्लिंगैस्त्रिभिरेभि
रधोक्षजः स्वलक्षितगतिर्ब्रह्मन्सर्वेषां मम चेश्वरः २० कालं कर्म स्वभावं च मायेशो मायया स्वया आ
त्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे २१ कालाद्गुणव्यतिकरः परिणामः स्वभावतः कर्मणो जन्म मह
तः पुरुषाधिष्ठितादभूत् २२

षां भावस्तत्त्वं तस्मिन् द्रव्यं महाभूतानि ज्ञानशब्देन देवताः क्रियाइंद्रि
याणि तदाश्रयास्तेषां कारणभूतास्तत्तदभिमानेनैव बध्नंति १९ अतः स एव वध्यमाय एभिर्गुणैर्लिंगैर्जीवाना
मावरकैरुपाधिभिः सुष्ठु अलक्षिता गतिस्तत्त्वं यस्य सः स्वेभ्यः तैरेव लक्षिता गतिर्यस्येति वा २० तस्य सृष्टिप्रकार
माह कालमिति कालः क्षोभकः कर्म जीवादृष्टं विबुभूषुर्विविधं भवितुमिच्छुः सन् २१ गुणानां व्यतिकरः क्षोभः सा
म्यत्यागः स्वभावतः परिणामो रूपांतरापत्तिः पुरुष ईश्वरस्तेनाधिष्ठितत्त्वं कर्मणा विशेषेण महतः महत्तत्त्वस्य २२

तस्मैनमोधीमहियस्यमाययामोहितास्संतोयुष्मदादयोमांजगद्गुरुंजगत्कर्त्तारंवदंतितस्मै १२ यन्माययेति
मायासंबंधोक्तेस्तस्यादुर्जयत्वोक्तेश्चतस्यापिकिमस्तिसंसारः नैवेत्याहमन्वयपदमसीजानातीति यस्य
दृष्टिपथेस्थातुंविलज्जमानयैवतस्मिन्स्वकार्य्यमकुर्वत्याअमुयामाययाविमोहिताअस्मदादयोदुर्धियोगि
धारतत्राज्ञानाएवकेवलंविकत्थंतेश्लाघंतेऽनेनयद्रूपमित्यस्यप्रश्नोत्तरमुक्तंभवति १३ तदेवंस्वस्मादन्यंपर
मेश्वरंनिरूप्येदानींयदधिष्ठानमित्यादिनवप्रश्नान्सएवाधिष्ठानादिकंसर्वइत्युत्तरंवक्तुंतद्व्यतिरेकेणान्य

तस्मैनमोभगवतेवासुदेवायधीमहि यन्माययादुर्जययामांब्रुवंतिजगद्गुरुं १२ विलज्जमान
यायस्यस्थातुमीक्षापथेमुया विमोहिताविकत्थंतेममाहमितिदुर्धियः १३ द्रव्यंकर्मचकालश्च
स्वभावोजीवएवच वासुदेवात्परोब्रह्मन्नचान्योर्थोस्तितत्वतः १४ नारायणपरावेदादेवानारायणांग
जाः नारायणपरालोकानारायणपरामखाः १५ नारायणपरोयोगोनारायणपरंतपः नारायणपरं
ज्ञानंनारायणपरागतिः १६

स्यासत्वमाह द्रव्यमिति द्रव्यंमहाभूतान्युपादानरूपाणिकर्मजन्मनिमि
त्तं कालस्तत्क्षोभकः स्वभावस्तत्परिणामहेतुः जीवोभोक्तावासुदेवात्परोऽन्योर्थोनास्तिकारणव्यतिरेकात्का
र्यस्य १४ तत्प्रपंचयतिद्वाभ्यां नारायणः परः कारणंयेषांते अनेनैवशास्त्रयोनित्वप्रतिपादनेनेश्वरेप्रमाणंसर्वज्ञ
त्वादिकंचोक्तं देवाश्चतदंगजाताः अतोनतद्व्यतिरिक्ताः लोकाः स्वर्गादयस्तदानंदांशाः मखास्तत्साधनभूताः १५ यो

गः प्राणायामादिस्तपस्तत्साध्यंचित्तैकाग्र्यंज्ञानंतत्साध्यागतिस्तत्फलमनेनैवंसर्वंतदधीनमित्युक्तं १६ ॥

स्वतोरूपवत्तेजोवायुनभसोःकारणभूतयोरन्वयात्स्पर्शशब्दवच्चैवमंभसःपृथिव्याश्चपूर्वान्वयाधिक्याद्गुणाधिक्यं २७
घोषःशब्दः २८ विशेषःपृथ्वी २९ मनःशब्देनवृत्तदधिष्ठाताचंद्रोपिद्रष्टव्योन्येचदशदेवावैकारिकाःसात्त्विकाहंकारका
र्याइत्याहदिग्श्चवातश्चार्कश्चप्रचेताश्चाश्विनौचैतेपंच श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारःवह्निश्चेंद्रश्चोपेंद्र
श्चमित्रश्चकश्चप्रजापतिरित्येतेपंचवाक्पाणिपादपायूपस्थानामधिष्ठातारः ३० यतोज्ञानशक्तिर्बुद्धिःक्रियाशक्तिःप्रा

वायोरपिविकुर्वाणात्कालकर्मस्वभावतः उदपद्यततेजोवैरूपवत्स्पर्शशब्दवत् २७ तेजसस्तुविकुर्वाणादासी
दंभोरसात्मकं रूपवत्स्पर्शवच्चांभोघोषवच्चपरान्वयात् २८ विशेषस्तुविकुर्वाणादंभसोगंधवानभूत् परा
न्वयाद्रसस्पर्शशब्दरूपगुणान्वितः २९ वैकारिकान्मनोजज्ञेदेवावैकारिकादश दिग्वातार्कप्रचेतोऽश्विवह्नी
द्रोपेंद्रमित्रकाः ३० तैजसात्तुविकुर्वाणादिंद्रियाणिदशाभवन् ज्ञानशक्तिःक्रियाशक्तिर्बुद्धिःप्राणस्तुतैजसौ
श्रोत्रंत्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायवः ३१ यदैतेसंगताभावाभूतेंद्रियमनोगुणाः यदायतन
निर्माणेनशेकुर्ब्रह्मवित्तम ३२ तदासंहत्यचान्योन्यंभगवच्छक्तिचोदिताः सदसत्त्वमुपादायचोभयंसस
जुर्ह्यदः ३३

णश्चतैजसाहंकारकार्यौयतोज्ञानक्रियाविशेषरूपाणिइंद्रियाण्यपितैजसादभवन्नित्यर्थः
तान्याहश्रोत्रमितिदोःपाणीमेढ्रमुपस्थःक्रमस्त्वत्रनविवक्षितः ३१ एवंकारणसृष्टिमुक्त्वाकार्यसृष्टिमाह यदाए
तेऽसंगताअमिलिताआसन् अतएवयदाआयतनस्यशरीरस्यनिर्माणेनशेकुः ३२ तदासदसत्त्वंप्रधानगुणभावमुपा
दायस्वीकृत्यउभयंसमष्टिव्यष्ट्यात्मकंशरीरम् ३३ ॥

विकुर्वाणाद्विक्रियमाणात् तस्य च क्रियाज्ञानशक्तित्वात् त्रिगुणत्वेपि रजःसत्वाभ्यामुपबृंहितत्वम् अहंकारस्य वैकारिकत्वात् तमः
प्रधानत्वम् अत एवाहंकारकार्येषु तामसमाकाशादिकं बहुलं राजसं सात्विकं चाल्पम् एवं तदुपाधिके जीवेष्वपि तथै ३७
व तामसाधिक्यं २३ स च विकुर्वन् रूपान्तरं गच्छन् त्रैविध्यमेवाह वैकारिकः सात्विकस्तैजसो राजसः यद्भिदा यस्य
भेदः द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्ये महाभूतारव्ये शक्तिर्यस्य क्रियास्विंद्रियेषु शक्तिर्यस्य
ज्ञानेषु देवेषु शक्तिर्यस्य हे प्रभो बोद्धुं शक्त २४ भूतादेरिति तामसस्य विशेषणं ननु तामसात्प्रथमं शब्दो भवतीति

महतस्तु विकुर्वाणाद्रजःसत्वोपबृंहितात् तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः २३ सोहंकार इ
ति प्रोक्तो विकुर्वन्समभूत्त्रिधा वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा द्रव्यशक्तिः क्रियाशक्तिर्ज्ञा
नशक्तिरिति प्रभो २४ तामसादपि भूतादेर्विकुर्वाणादभून्नभः तस्य मात्रा गुणः शब्दो लिंगं यद्द्र
ष्टृदृश्ययोः २५ नभसोथ विकुर्वाणादभूत्स्पर्शगुणोनिलः परान्वयाच्छब्दवांश्च प्राण ओजः
सहो बलम् २६

प्रसिद्धं सत्यं स तु तस्य नभसो मात्रा सूक्ष्मं रूपं गुणश्चासाधारणो व्यावर्तको धर्मः श्रो
त्रद्वारा नभतत्त्वस्य द्योतक इत्यर्थः एवमेव स्पर्शादिष्वपि द्रष्टव्यं शब्दस्य लक्षणं लिंगमिति कुड्याद्यंतरितेन केनचि
दुच्चैर्योऽयं गज इत्युक्ते यो गजद्रष्टा यश्च तेन दृश्यो गजस्तयोर्लिंगं बोधकं लिंगविशेषणत्वाद्यच्छब्दस्य षंढत्वम्
२५ परस्य नभसः कारणत्वेनान्वयाच्छब्दवांश्च वायुस्तस्यैव लक्षणं प्राणो देहधारणम् ओजः सहो बलानीन्द्रियम

त्रिलोककल्पनमाह भूर्लोकः पातालादिसहितः ४२ ॥ इति द्वितीये पंचमः ॥ ५ ॥ षष्ठे विराड्विभूतिश्च प्रोक्ताध्यात्मादि
भेदतः दृढीकृतं च पूर्वोक्तं सर्वं पुरुषसूक्ततः ॥ इदानीं वैराजस्य विभूतिः सप्रपंचमनुवर्णयते वाचामस्मदादिवागिं
द्रियाणां तदधिष्ठातुर्वह्नेश्च तस्य मुखं क्षेत्रमुत्पत्तिस्थानं छंदसां गायत्र्यादीनां सप्तानां तस्य सप्त धातवस्त्वगादयः
क्षेत्रं हव्यं देवानामन्नं कव्यं पितॄणाममृतं तदुभयशेषं मनुष्याणां तेषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य चकाराद

महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलं पातालं पादतलत इति लोकमयः पुमान् ४१ भूर्लोकः कल्पितः प
द्भ्यां भुवर्लोकोऽस्य नाभितः स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ४२ ॥ इति श्रीमद्भागवते महापुरा
णे द्वितीयस्कंधे महापुरुषस्यानुवर्णनं पंचमोऽध्यायः ॥ ५ ॥ ब्रह्मोवाच ॥ वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्त
धातवः हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च १ सर्वासूनां च वायोश्च तन्नासे परमायने अश्वि
नोरोषधीनां च घ्राणो मोदप्रमोदयोः २ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी कर्णौ दिशां च तीर्थानां
श्रोत्रमाकाशशब्दयोः तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनं ३

स्मदादिरसनेंद्रियस्य तदधिष्ठातुर्वरुणस्य च
तस्य जिह्वा क्षेत्रमुत्पत्तिस्थानं एवं सर्वत्रानुक्रमेणेयं १ सर्वासूनामस्मदादिप्राणानां तस्य नासे नासारंध्रे परमायने
उत्तमस्थाने मोदप्रमोदयोश्च सामान्यविशेषगंधयोर्घ्राणः घ्राणेंद्रियं परमायनं २ रूपाणां तेजसां रूपप्रकाशानां
चक्षुरिंद्रियमक्षिणी नेत्रगोलके सर्वत्र षष्ठ्यंतानां प्रथमांतं क्षेत्रं द्रष्टव्यं कर्णौ श्रोत्राधिष्ठाने श्रोत्रमिंद्रियं तस्य गात्रं
शरीरं वस्तूनां ये साराः शक्तिषां भजनं स्थानम् ३

कालकर्मस्वभावानधिष्ठायस्थितः जीवयतीतिजीवः परमात्मा अजीवमचेतनमजीवयच्चेतयतिस्म ३४ निर्भिद्य पृथ
क्त्यस्थितइत्यर्थः ३५ तदवयवैर्लोकरचनामाह यस्येति कटिरिति ऊरुमूलयोः पश्चाद्भागः जघनंपुरोभागः अ
धः सप्तलोकान् अतलादीन् ऊर्ध्वं भूरादीन्सप्त ३६ वर्णानांतदुत्पत्तिंदर्शयति पुरुषस्येति ब्रह्म ब्राह्मणाः मुखमि
तिकार्यकारणयोरभेदविवक्षयोक्तं बाहवइतिच क्षत्रं क्षत्रियः ३७ इदानीमुपासनार्थंलोककल्पनाभेदान्दर्शय

वर्षपूगसहस्रांते तदंडमुदकेशयं कालकर्मस्वभावस्थो जीवोजीवमजीवयत् ३४ स एव पुरुषस्तस्मादंडं नि
र्भिद्य निर्गतः सहस्रोर्वंघ्रिबाह्वक्षः सहस्राननशीर्षवान् ३५ यस्येहावयवैर्लोकान्कल्पयंतिमनीषिणः
कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ३६ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ऊर्वोर्वैश्यो भगवतः
पद्भ्यां शूद्रो व्यजायत ३७ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकस्य नाभितः हृदा स्वर्लोक उरसा महर्लो
को महात्मनः ३९ तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं ४०

न्सप्तलोकपक्षमाहद्वाभ्यां भूर्लोकः पातालमारभ्य पद्भ्यांकटिपर्यंताभ्यां ३८ स्तनद्वयादिति उपासनार्थत्वा
दूर्ध्वाधोभाववैपरीत्येन दोषः यद्वास्तनतः प्रावृत्कुर्वत् यदोष्ठद्वयंतस्मादित्यर्थः ब्रह्मलोकः वैकुंठाख्यः सनातनः नि
त्यः नतुसृज्यप्रपंचांतर्वर्तीत्यर्थः ३९ इदानींचतुर्दशलोकपक्षंदर्शयति तत्रजघनादिभिर्भूरादयः सप्तोर्ध्वलोका
एवसप्तकट्यादिभिरधः सप्तलोकानाह तत्कट्यामितिद्वाभ्यां शुद्धं हरिभक्तनिवासत्वात् ४० ॥ ऽऽ ॥ ऽऽ ॥

विष्णुस्तनो[illegible]

~~मू० ४१ पाताल[illegible]पार्ष्णिप्रपदेरसातलं महातलं[illegible]~~

मू० ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात् मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ।४०।१।

भा॰टि॰ अव्यक्तं प्रधानं रसोऽन्नादिसारः सिंधवः समुद्रास्तेषां निधनस्य लयस्योदरं पदं स्थानं विदितं ज्ञानिभिः मनसोऽ
२० स्मदादिलिंगशरीरस्य १० तुभ्यं तव कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्यात्मा चित्तं परमायनं ११ एवं तावत्
परमेश्वराज्जातं विश्वं ततो न भिन्नं यथा कुंडलं सुवर्णान्न पृथक् स तु सर्वनियंता सर्वप्रकाशको नित्यमुक्त इ

अव्यक्तरससिंधूनां भूतानां निधनस्य च उदरं विदितं पुंसो हृदयं मनसः पदं ११ धर्म्मस्य
मम तुभ्यं च कुमाराणां भवस्य च विज्ञानस्य च सत्वस्य परस्यात्मा परायणम् ११ अ
हं भवान् भवश्चैव त इमे मुनयोऽग्रजाः सुरासुरनरा नागाः खगा मृगसरीसृपाः १२ गं
धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः १३
अन्ये च विविधा जीवा जलस्थलनभौकसः ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः १४

त्यर्थादुक्तमेतदेव पुरुषसूक्तार्थकथनेन द्रढयति तत्र सहस्रशीर्षेति ऋगर्द्धस्य ब्राह्मणोऽस्य मुखमासीदि
त्यादेश्च ऋक्त्रयस्यार्थः एवंविधाय एव दृश्यतेः पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति अहं भवानिति सार्द्ध
त्रिभिस्तेऽग्रजा इमे सनकादयः मरीच्यादयश्च १२ १३ जले च स्थले च नभश्चौकांसि येषां ते नभौकसः इति संधिरार्षः १४ २०

अस्यत्वकस्पर्शस्यवायोश्चेत्यर्थःसर्वस्यमेधस्ययज्ञस्यउद्भिज्जजातीनांसर्ववृक्षाणांयैर्वृक्षैर्यज्ञःसम्यक्साधितस्तेषामे
ववा ४ केशामेघानांदेवेस्पर्वतघोक्तेः श्मश्रूणिविद्युतांपादकरनखानिशिलालोहानामितिसादृश्योहृद्यंक्षेमकर्म
णांपालनकर्तृणां ५ विक्रमःपादन्यासोभूरादिलोकानामास्पदमाश्रयः भूरादिशब्दानामव्ययत्वात्षष्ठ्यालुक्

त्वगस्यस्पर्शवायोश्चसर्वमेधस्यचैवहि रोमाण्युद्भिज्जजातीनांयैर्वायज्ञस्तुसंभृतः ४ केशश्म
श्रुनखान्यस्यशिलालोहाभ्रविद्युतां बाहवोलोकपालानांप्रायशःक्षेमकर्मणां ५ विक्रमोभू
र्भुवःस्वश्चक्षेमस्यशरणस्यच सर्वकामवरस्यापिहरेश्चरणआस्पदम् ६ अपांवीर्य
स्यसर्गस्यपर्जन्यस्यप्रजापतेः पुंसःशिश्नउपस्थस्तुप्रजात्यानन्दनिर्वृतेः ७ पायुर्यम
स्यमित्रस्यपरिमोक्षस्यनारद हिंसायानिर्ऋतेर्मृत्योर्निरयस्यगुदंस्मृतम् ८ पराभूतेर
धर्मस्यतमसश्चापिपश्चिमः नाड्योनदनदीनांतुगोत्राणामस्थिसंहतिः ९

रक्षणं १ क्षेमोत्वक्ष्यैशरणंभयाद्रक्षणंसर्वेषांकामानांवरस्यवरणस्यापिहरेरंघ्रिरास्पदं ६ वीर्यस्यशुक्रस्यशिश्नोधि
ष्ठानमुपस्थस्त्विंद्रियंप्रजात्यानंदःसंतानार्थःसंभोगस्तेननिर्वृत्तिस्तापहानिस्तस्याः ७ परिमोक्षस्यमलत्यागस्य
पायुरिंद्रियंगुदंस्थानंनिर्ऋतेरलक्ष्म्याः ८ तमसोऽज्ञानस्यपश्चिमःपृष्ठभागः गोत्राणांगिरीणामस्थिसंघातः ९ ॥

तदेवमीश्वरोनित्यमुक्तइत्युक्तं तदाश्रितानांतुभूतानांबंधमोक्षौव्यवस्थयेतिदर्शयन् पादोस्यविश्वाभूतानीत्यस्यार्थमाह पादेष्विति तिष्ठंत्यस्मिन्निति स्थितयो भूरादिलोकास्ते पादा इव पादा अंशायस्यसस्थितिपात् तस्यपादेष्वंशभूतेषुलोकेषुसर्वाणिजीवान्विदुः मंत्रेतु पादोस्यविश्वाभूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेययोरभेदविवक्षया पादइत्येकवचनं चे सामान्याभिप्रायेणेति व्याख्यातंभवति तेषुफलवैचित्र्यं दर्शयंस्त्रिपादस्यामृतंदिवीत्यस्यार्थमाह अस्येश्वरस्यसंबंधि त्रिपादमृतं नित्यसुखं दिवि ऊर्ध्वलोकेषु नत्रिलोक्यामित्यर्थः तदेवत्रिपाच्छब्दोक्तं त्रैविध्यं दर्शयन्नाह त्रयाणांलोकानांमूर्ध्नां महर्लोकस्तस्यमूर्ध्नोनंतरं उपरितनलोकास्तेषुयथाक्रमं अमृतादिकं अधायि निहितं तत्र

पादेषुसर्वभूतानिपुंसः स्थितिपदोविदुः अमृतंक्षेममभयंत्रिमूर्ध्नोधायिमूर्धसु १८ पादास्त्रयोबहिश्चासन्नप्रजानांयआश्रमाः अंतस्त्रिलोक्यास्त्वपरोगृहमेधोबृहद्व्रतः १९

त्रिलोक्यांनश्वरमेवसुखं महर्लोकस्यक्रममुक्तिस्थानत्वेपिकल्पांतेतत्रत्यानांस्थानत्यागान्नाविनाशिसुखंयावज्जीवंस्वस्थानापरित्यागात्किंतुमहर्लोकवासिनांकल्पांतेत्रिलोकदाहोष्मपीडितानांतदातत्रगमनात्क्षेमदर्शनमस्ति तपोलोकेतस्याभावात्क्षेममेववक्ष्यतिहि त्रिलोक्यांदह्यमानायांशक्त्यासंकर्षणाग्निनायांत्यूष्मणामहर्लोकाज्जनंभृग्वादयोर्दिताइति सत्यलोकेत्वभयंमोक्षःतत्रत्यासत्तेः १८ तदेववैचित्र्यमधिकारिभेदेनोपपादयन्त्रिपादूर्ध्वइत्यस्यार्थमाह नप्रजायंतेपुत्रादिरूपेणेत्यप्रजाः नैष्ठिकब्रह्मचारिवानप्रस्थयतयस्तेषामाश्रमास्त्रिलोक्याबहिरासन् गृहमेधस्त्वंतः यस्मादबृहद्व्रतः ब्रह्मचर्यव्रतरहितः १९ २१

सर्वंपुरुषएवनततःपृथगित्यर्थः प्रपंचेनतस्यापरिछेदंवक्तुंसभूमिमित्यस्यार्थमाह तेनपुरुषेणविश्वमिति
भूमिपदस्यार्थः वितस्तिमितिदशांगुलपदस्यत्र धीत्यतिशब्दस्य सचवितस्तिमधिकंव्याप्यतिष्ठतीत्याधिक्य
मात्रंविवक्षितं नप्रमाणमनुपयोगात्परिछिन्नत्वाच्च १५ एतत्सदृष्टांतमाह असौप्राणः आदित्यः असौवा आ
दित्यःप्राण इतिश्रुतेः सविधिस्थंमंडलंप्रकाशयन्यथाबहिश्चप्रकाशयति एवंविराट्देहंप्रकाशयन्ब्रह्मांड
मंतर्बहिश्चप्रकाशयति १६ नित्यमुक्तत्वंदर्शयितुंउतामृतत्वस्येत्यस्यार्थमाहसइति अभयस्येतिमंत्रेणतम्

सर्वंपुरुषएवेदंभूतंभव्यंभवच्चयत् तेनेदमावृतंविश्वंवितस्तिमधितिष्ठति १५ सविधिस्थंप्रतप
न्स्वांशेनबहिश्चप्रतपत्यसौ एवंविराजंप्रतपंस्तपत्यंतर्बहिःपुमान् १६ सोऽमृतस्याभयस्येशोमर्त्य
मन्नंयदत्यगात् महिमैषततोब्रह्मन्पुरुषस्यदुरत्ययः १७

तपदव्याख्या अन्नेनेतिपदंविभक्तिव्यत्य
येनव्याचष्टेमर्त्यंमरणधर्मकमन्नंकर्मफलंयस्मादत्यगात् अतिक्रांतवान् अतोनकेवलंसर्वात्मकःकिंतुअम
तत्वस्यनिजानंदस्यापिईश्वरइत्यर्थः ननुप्रपंचात्मकस्यकुतोनित्यमुक्तत्वमित्याशंक्यतत्परिहारायएतावान
स्येत्यस्यार्थमाह महिमेति प्रपंचात्मकस्याप्यमृतेशत्वमित्येषमहिमादुरत्ययः अपारः प्रपंचोनभिन्नस्तत्वा
दितिभावः मंत्रेणचएतावानस्यमहिमाविभूतिः सतुज्यायान्महत्तरइतिवदताऽयमेवार्थउक्तः १७

वस्तूनिपात्रादीनि ओषधयोव्रीह्यादयः स्नेहघृतादयः रसामधुरादयः लोहानिसुवर्णादीनि मृदम्भश्च चातुर्होत्रादिकंकर्म
नामधेयानिज्योतिष्टोमादीनि ऋग्गादीनामुक्तत्वान्मंत्राइतिस्वाहाकारादयः देवतानामनुक्रमउद्देशः कल्पोबौधायनादिकर्म
पद्धतिग्रंथोऽनेनाहंयजेयइतिसंकल्पस्तंत्रमनुष्ठानप्रकारः २४ गतयोविष्णुक्रमाद्याःमतयोदेवताध्यानानि कृतस्यभगव
तिसमर्पणं २५ संभृताःसंपादिताःसंभारायेनसोऽहंतेनैवयज्ञेनैव श्रेनेनयज्ञेनयज्ञमयजंतेतिमंत्रार्थःसूचितः २६ तेनदेवा

वस्तूनोषधयःस्नेहारसलोहमृदोजलं ऋचोयजूंषिसामानिचातुर्होत्रंचसत्तम नामधेयानिमंत्राश्च
दक्षिणाश्चव्रतानिच देवतानुक्रमःकल्पःसंकल्पस्तंत्रमेवच २४ गतयोमतयश्चैवप्रायश्चित्तंसमर्पणं
पुरुषावयवैरेतेसंभाराःसंभृतामया २५ इतिसंभृतसंभारःपुरुषावयवैरहं तमेवपुरुषंयज्ञंतेनै
वायजमीश्वरं २६ ततस्तेभ्रातरइमेप्रजानांपतयोनव अयजन्व्यक्तमव्यक्तंपुरुषंसुसमाहिताः २७
ततश्चमनवःकालेईजिरेऋषयोऽपरे पितरोविबुधादैत्यामनुष्याःक्रतुभिर्विभुं २८ नारायणेभगवति
तदिदंविश्वमाहितं गृहीतमायोरुगुणःसर्गादावगुणःस्वतः २९ अयजंतेत्यस्यार्थंसप्रपंचंदर्शयतितत
इतिद्वाभ्यां व्यक्तंइंद्रादिरूपेणाव्यक्तंस्वतोऽनेनपुरुषंजातमग्रतइत्यस्यार्थोदर्शितः २७ कालेस्वस्वावसरे २८ प
दधिष्ठानमित्येतत्श्लोकार्धद्वयार्थमुपसंहरतिनारायणइति आहितमधिष्ठितं भगवत्त्वेहेतुर्यःस्वतोऽगुणःसर्गादौगृहीतो
मायायाउरवोगुणाःयेनतस्मिन् २९

अयं चाधिकारभेद एकस्यैवावस्थाभेदेन नत्वत्यंतभिन्नविषय इति दर्शयं ततो विष्वङ्ङित्यस्यार्थमाह विविधंस्व
रूपंचक्रमेति [illegible] विष्वङ् पुरुषः क्षेत्रज्ञः सतीमार्गौ दक्षिणोत्तरौ विचक्रमे चलतिस्म कथंभूते सती साशनान
शने भोगापवर्गप्राप्तिसाधनभूते अत्र हेतुत्वेन पुनर्विशेषणं यद्यतः अविद्या कर्मरूपा एका विद्या च तत्साध्योपासना
रूपान्या २० तदेवं विराडंतर्वर्तिनां फलवैचित्र्यमुक्त्वा अन्तःकारणेश्वरस्य तद्वैलक्षण्यं दर्शयितुं ततो विराड् जायते त्यस्या
र्थमाह यस्मादंडं जज्ञे तत्र भूतेंद्रियगुणात्मकः विराट् च [illegible] जज्ञे स ईश्वरस्तद्विश्वं विराड्देहं द्रव्यं अंडं च अतिक्रांत

सतीं विचक्रमे विष्वङ् साशनानशने उभे यदविद्या च विद्या च पुरुषस्तूभयाश्रयः २० यस्मादंडं वि
राड् जज्ञे भूतेंद्रियगुणात्मकः तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् २१ यदास्य नाभ्यान्नलिना
दहमासं महात्मनः नाविदं यज्ञसंभारान् पुरुषावयवादृते २२ तेषु यज्ञस्य पशवः सवनस्पतयः कु
शाः इदं च देवयजनं कालश्चोरुगुणान्वितः २३

गान् सूर्य इवेति पूर्वोक्त एव दृष्टांतः २१ नन्वेवं पुरुष एव चेत्स
र्वतर्हि यज्ञस्य तत्साधनानां च पृथक्त्वाभावाद्युक्ते पुरुषाराधनं न सिद्ध्येदित्याशंक्य तत्परिहाराय यत्पुरुषेण हविषेत्यादि
मंत्रार्थं संग्रहेण दर्शयति यदेत्यादिना अस्येति विराडंतर्यामिणस्तस्यैव प्रकृतत्वान्नाभौ भवं नाभ्यं तस्माद्यज्ञस्य संभार
साधनानि नापश्यं २२ तदा तेषु संभारेषु साध्येषु सत्सु पुरुषावयवैरेते संभाराः संभृता इति चतुर्थेनान्वयः वनस्पत
यो यूपाः देवयजनं यज्ञभूमिः इदं चेति विश्वं नाद्यज्ञाहस्थाने उपविष्टः कथयतीति गम्यते बहुगुणान्वितो वसंतादिका
लः २३

तदा समीयुषां शरणागतानां संसारनिवर्त्तकं मंगलावहं सुसेव्यं च तत्स्य चरणं नतोस्मि ततोऽचिंत्यमहिमत्वेन ज्ञातवान
स्मीति कैमुत्यन्यायेनाह योहीति स्वमायाविस्तारं यः स्वयमपि पर्य्यगात् परिच्छिद्य निषेधे एतावानिति न ज्ञातवानित्यर्थः ॥
अपरे कुतो जानीयुस्तस्य चरणं नतोस्मीति पूर्वेण संबंधः ननु सर्वज्ञः कथं न जानाति अंताभावादिति दृष्टांतेनाह यथा
स्वस्यांतं नभो नाप्नोति तद्वन्नहि खपुष्पादिदर्शनं सर्वज्ञत्वविहंतीति भावः तथा च वक्ष्यति द्युपतय एव ते न ययुरंतम

नतोस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं यो ह्यात्ममायाविभवं च पर्य्यगाद्यथा
नभः स्वांतमथापरे कुतः ३४ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः तन्मायया
मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ३५ यस्यावतारकर्माणि गायंति ह्यस्मदादयः ॥
न यं विदंति तत्त्वेन तस्मै भगवते नमः ३६

नंततया त्वमपि यदंतरांडनिचयाननु सावरणा इत्यादिश्रुतिभिश्च योस्याध्यक्षः परमे व्योमन् सो अंग वेद यदि
वा न वेदेति ३४ एतत्प्रपंचयति नाहमिति द्वाभ्यां वामदेवो रुद्रः यस्य ऋतां गतिं परमार्थस्वरूपं किं त्विदं प्रपंचरूपं
तत्स्वमायाविनिर्मितं विचक्ष्महे विद्मस्तदप्यात्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नं मोहितबुद्धय इत्येयं तदज्ञा
ने प्रपंचाज्ञाने च हेतुः ३५ ननु सर्वेपि तं वर्णयंतीदृश्यते तत्राह यस्येति ३६ ॥ ६६ ॥ राम ॥

यत्परस्त्वमित्येतत्प्रश्नोत्तरं यदुक्तं स एष भगवान्सर्वेषामम चेश्वर इति तदुपसंहरन्सृजामीति पालनं तु स्वयमेव करो-
तीत्याह विश्वमिति पुरुषरूपेण विष्णुरूपेण त्रिशक्तिर्मायातां धरतीति तथा सः ३० यच्चेदं विश्वं यदात्मकं च त्वमित्येवमा-
दि सर्वप्रश्नानां सामान्योत्तरं यदुक्तं वासुदेवात्परो ब्रह्मन्न चान्योर्थोस्ति तत्वत इति पुरुष एवेदं सर्वमिति श्रुत्या च य-
द्दृष्टीकृतं तदुपसंहरतीति कार्यकारणात्मकं भाव्यं सज्ज्यं भगवतः सकाशादन्यत्पृथङ् न भवतीत्यभिहितं ३१ य-

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ३० इति तेऽभिहितं ता-
त यथेदमनुपृच्छसि नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकं ३१ न भारती मेंऽग मृषोपलक्ष्यते न वै ।
क्वचिन्मे मनसो मृषा गतिः न मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः ३२ सोऽहं समा-
म्नायमयस्तपोमयः प्रजापतीनामभिवंदितः पतिः आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं
यत आत्मसंभवः ३३

दुक्तं एतावत्वं यतो हि मे तन्मम विज्ञाय मामीश्वरं प्रब्रवीषि तदुपपादयन्नुपसंहरति न भारतीति यद्यस्मान्मे मयौत्कं-
ठ्यं भक्त्युद्रेकस्तद्युक्तेन हृदा हरिर्धृतः ध्यातः अंग हे नारद अतो मे वाङ्मन इंद्रियाणां वृत्तयः सत्या एव नतु मत्प्रभा-
वेनेत्यर्थः ३२ यत्र स्वानुभवमेवान्वयव्यतिरेकाभ्यां सोऽहं समाम्नायादिभिः सर्वोत्कृष्टोपि योगमाश्रित्यापि यत आ-
त्मनो मम संभवो जन्म तमेव न ज्ञातवान् कुतोऽन्यस्य वार्त्ता एतच्च तृतीयस्कंधे पद्मोद्भवे वक्ष्यते ३३ ॥ ६ ॥

प्रमाणयतिव्याख्यां २

भा० द्वि० अवतारान्विस्तरेणाह आद्य इत्यादि यावत्समाप्ति परस्य भूम्नः पुरुषः प्रकृतिप्रवर्त्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्र
२४ हः स आद्योवतारः वक्ष्यति हि भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् स्वांशेन विष्टः पुरुषाभिधानमवाप ना
रायण आदिदेवः यथोक्तं विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं तृ
तीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति यद्यपि सर्वेषामविशेषेणावतारत्वमुच्यते तथापि कालस्य स्वभावस्य सदस

आद्योवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च द्रव्यं विकारो गुण इंद्रियाणि विराट् स्वराट् स्थास्नु
चरिष्णु भूम्नः ४० अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च स्वर्लोकपालाः खगलोकपा
ला नृलोकपालास्तललोकपालाः ४१ गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ये वा ऋषीणा
मृषभाः पितॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ४२ अन्ये च ये प्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः
४३

द्विति कार्यकारणात्मिका प्रकृतिश्च एताः शक्तयः मनआदीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षादयो विभू
तय इति विवेकः कार्यं मनः महत्तत्त्वं द्रव्यं महाभूतानि क्रमोत्र न विवक्षितः विकारोऽहंकारः गुणाः सत्वादिः विराट् समष्टिशरी
रं स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जंगमं व्यष्टिशरीरं ४० अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादयो य इमे प्रजेशा
स्तललोकपालाः पातालाधिपतयः ४१ गंधर्वादीनामीशाः यक्षादीनां नाथाः रक्षोरगेति संधिरार्षः ऋषीणां पितॄणां च श्रे २४
ष्ठाः ४२ प्रेतादीनामधीशाः ४३

अवतारकर्माणि संक्षेपतो दर्शयति स एष इति आद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादि करोति आत्मात्मन्यात्मनात्मानमि
ति कर्त्राधिकरणसाधनं कर्म च स्वयमेवेत्यर्थः पुरुषावतारः सृष्ट्यादीनि कर्माणीति संक्षेपोक्तिः ३९ न यं विदंतीति तत्त्वेनेत्यु
क्तं किं तत्तत्त्वमित्यपेक्षायामाह ज्ञानं केवलं सत्यं तत्त्वं घटाद्याकारवृत्तिज्ञानव्यवच्छेदार्थं विशेषणानि विशुद्धं विष
याकारशून्यं यतः प्रत्यक् सर्वांतरं अत एव सम्यक् संदेहादिरहितं अवस्थितं स्थिरं यतो निर्गुणं गुणकार्यं हि गुण
व्यतिकरादचलं भवति यद्यपि वृत्तिज्ञानमपि स्वरूपज्ञानमेवेति न चाचल्यादिदोषयुक्तं तथाप्यंतःकरणवृत्तिदो

स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः आत्मात्मन्यात्मनात्मानं संयच्छति च पाति च ३९ विशु
द्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमद्वयं ४० ऋषे विदंति मु
नयः प्रशांतात्मेंद्रियाशयाः यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम् ४१

षैस्तथा तथा भवतीति व्यवच्छिद्यते एभिरेव विशेषणैः सत्यत्वमपि समर्थितं किंच यद्विकारवत्तत्तदसत्यं दृष्टं न चास्य
जन्मादयः षड्विकाराः संतीत्याह अनाद्यंतं जन्मनाशरहितं अत एव जन्मानंतरास्तित्वलक्षणोपि विकारो नास्ति वृ
द्धिविपरिणामापक्षयाश्च न संति यतः पूर्णं सर्वत्र हेतुः नित्यमद्वयं नित्यं सर्वदा द्वैतप्रतीतिसमयेपि परमार्थतोऽ
द्वयमिति ४० अत्र विद्वदनुभवं प्रमाणयति हे ऋषे नारद प्रशांतात्मेंद्रियाशयाः प्रसन्नदेहेंद्रियमनसो यदा भवंति
तदा विदंति अन्यदा तदज्ञाने कारणमाह यदा तु तदेव प्रकाशमानमेव असत्तर्कैः विप्लुतं स्यात् तदा तिरोधीयेतेति
४१

यज्ञावतारमाह रुचेःप्रजापतेःसकाशात्तद्भार्यायां आकूतेःसूनुःसुयज्ञोनामजातःसचस्वभार्यायांदक्षिणायांसुय
मान्देवानजनयत् सचेंद्रःसन्यदा आर्त्तिमहरत् तदापूर्वं सुयज्ञइत्युक्तोप्यनुपश्चान्मनुनामातामहेनहरिरि
त्युक्तः अनेनदेवोत्पादनंत्रैलोक्यार्त्तिहरणंचतस्यकर्मदर्शितमेवंसर्वत्रावतारंतत्कर्मचद्रष्टव्यं २ कपिलावता
रमाह कर्दमस्यप्रजापतेर्गृहेचतद्भार्यायांदेवहूत्यांजज्ञेनवभिःस्त्रीभिर्भगिनीभिःसहसचस्वमात्रेआत्मग

जातोरुचेरजनयत्सुयामान्सुयज्ञआकूतिसूनुरमरानथदक्षिणायां लोकत्रयस्यमहतीमह
रद्यदार्त्तिंस्वायंभुवेनमनुनाहरिरित्यनूक्तः २ जज्ञेचकर्दमगृहेद्विजदेवहूत्यां स्त्रीभिःसमंनव
भिरात्मगतिंस्वमात्रे ऊचेययात्मशमलंगुणसंगपंकमस्मिन्विधूयकपिलस्यगतिंप्रपेदे ३ अ
त्रेरपत्यमभिकांक्षतआहतुष्टोदत्तोमयाहमितियद्भगवान्सदत्तः यत्पादपंकजपरागपवित्रदे
हायोगर्द्धिमापुरुभयींयदुहैहयाद्याः ४

तिंब्रह्मविद्यामुक्तवान् ययात्मगत्यासात्मनःशमलंमलिनीकरणंगुणसंगरूपंपंकमस्मिन्नेवजन्मनिविधूय
कपिलस्यगतिंमुक्तिंप्राप्तवती ३ दत्तात्रेयावतारमाह मयाहमेवतुभ्यंदत्तइतियद्यत आह ततःसनाम्नादत्तो
जातःसभक्तेभ्योयोगैश्वर्यदानंतच्चरितंदर्शयति यस्यपादपंकजयोःपरागस्तेनपवित्रादेहायेषांतेउभयींऐ
हिकीमामुष्मिकींचभुक्तिंमुक्तिरूपांवा ४ ॥ ॥ ॥

किंबहुना यत्किंचिद्भगवदादि तत्सर्वं परमेव तत्त्वमित्यन्वयः भगवदैश्वर्ययुक्तं ओजः सहः इंद्रियमनःशक्ती तद्युक्तं
बलं दार्ढ्यं श्रीः शोभा ह्रीः कर्मसु जुगुप्सा विभूतिः संपत्तिः आत्मा बुद्धिस्तद्युक्तं अर्णो वर्णो अद्भुतार्णमाश्चर्यवर्णमित्यर्थः
रूपमेव स्वरूपं रूपवद्रूपं च यत्तत्सर्वं परं तत्त्वं तद्विभूतिरित्यर्थः ४४ मुख्यतत्त्वावताराननुवक्तुमाह प्राधान्यत इति आ
त्मकथाश्रवणैः ये कर्णयोः कषायाः मलास्तान् शोषयंतीति तथा तान् सुपेशान् सुंदरान् सकारलोपश्छांदसः हे स्व

य२ यत्किंच लोके भगवन्महस्वदोजः सहस्वद्बलवत्क्षमावत् ॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं प
रं रूपवदस्वरूपं ॥ ४४ ॥ प्राधान्यतो यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः ॥ आपीयतां कर्ण
कषायशोषाननुक्रमिष्ये त इमान्सुपेशान् ॥ ४५ ॥ इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे ब्रह्मना
रदसंवादे विभूतिवर्णने षष्ठोऽध्यायः ॥ ६ ॥ ब्रह्मोवाच ॥ यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्
क्रौडीं तनुं सकलयज्ञमयीमनंतः अंतर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो द
दार ॥ १

षेते तुभ्यमनुक्रमिष्ये तदनुक्रमणमत्र त्वयापीयतामित्यर्थः यद्वा पीयतामिति शब्दं तं आपीयतां कर्णकषाय
शोषानित्यर्थः ४५ ॥ इति द्वितीये षष्ठः ॥ ६ ॥ सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः नारदायत्तु तत्कर्मप्रयोज
नगुणैः सह यत्र यदा क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत्सन्नुद्यतोऽनंतः तदांतर्महार्णव उपागतं हिरण्याक्षं दंष्ट्रया दद

चरित्रे ऐवं कथमप्यवतारं सूचयति मातुः सपत्न्या उदितान्युक्तानि वाक्यान्येव पत्रिणो बाणास्तैर्विद्धो ध्रुवः राज्ञ उत्तानपदे
र्नि समीपे तपसे तपस्तप्तुं ध्रुवगतिं ध्रुवपदं यतयामुपरि स्थिता मधस्तात् स्थिता दिवि भवाः दिव्याः सप्तर्षयः स्तुवंति यद्वा
उपरिस्थिता भृग्वादयः अधस्तात् सप्तर्षय इति ८ पृथ्ववतारमाह यद्यदर्षिभिरर्थित स्तदा वेणं त्रात्वा अन्वर्थतः पुत्र
इति पदं नाम लेभे पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति हि पुत्रपदव्युत्प

विद्धः स्वपत्न्युदितपत्रिभिरंति राज्ञो बालोपि सन्नुपगतस्तपसे वनानि तस्मा अदाद्ध्रुवगतिं गृणते प्रसन्नो
दिव्याः स्तुवंति मुनयो यदुपर्यधस्तात् ८ यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतं
तं त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन ९ नाभेरसावृषभ आस
सुदेविसूनुर्यो वै चचार समदृग्जडयोगचर्यां यत्पारमहंस्यमृषयः पदमामनंति स्वस्थः प्रशांत
करणः परिमुक्तसंगः १०

त्तिः कथंभूतं द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं दग्धं पौरुषं भगमैश्वर्यं च यस्य तं चरित्रांतरमाह येन च जगति जग
द्दुग्धेव वसूनि अन्नादि द्रव्याणि दुग्धा ९ ऋषभावतारमाह असौ हरिः नाभेराग्नीध्रपुत्रात् सुदेव्याः सूनुरास ना
भेर्भार्यायामेरुदेव्या एव सुदेवीत्यपि संज्ञा जडवद्योगेन नित्यं समाधिना चर्यां यदिति यांतत्र हेतुः समदृक् तत्रापि हे
तुः स्वस्थः स्वरूपे स्थितः यतः प्रशांतेन्द्रियस्ततः कुतो यतः परितो मुक्तः संगः १० ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

कुमारावतारमाह मेमयाऽऽदौ यत्तपस्तप्तं तस्मात्स्वतपसः महत्तपसो हेतोः स हरिश्चतुःसनोऽभूत् सनत्कुमारः सनकः स
नन्दनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य सः सनादखंडितात् यद्वा स्वतपसः सनाद्दानात्स्वमर्पणादित्यर्थः षणु
दाने स च पूर्वकल्पस्य संप्लवे विनष्टमुच्छिन्नसंप्रदायमात्मतत्त्वमिहास्मिन्कल्पे सम्यग्जगादोक्तवान् सम्य
क्दर्शयति यद्गृहीतमात्रमेव च मुनयः आत्मन्मनस्यचक्षत साक्षादपश्यन् ५ नरनारायणावतारमाह धर्मस्य
पत्न्यां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन जातः कथंभूतः स्वोऽसाधारणस्तपःप्रभावो यस्य त

सैन्यानि

तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् प्राक्कल्पसंप्लवविनष्टमिहा
त्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ५ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्व
तपःप्रभावः दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः ६ कामं दहंति कृ
तिनो ननु रोषदृष्ट्या रोषं दहंतमपि ते न दहंत्यसह्यं सोऽयं यदंतरमलं निविशन्बिभेति कामः कथं नु पुनरस्य मनः
श्रयेत ७

दिवाह अनंगस्य पृतना देव्योऽप्सरसः भगवतः सकाशादात्मनः स्वप्रतिरूपाः उर्वश्याद्याः स्त्रीर्दृष्ट्वा तस्य निय
मावलोपं प्रतिभंगं घटितुं साधयितुं न शेकुः यद्वा आत्मनः स्वस्य यो नियमस्तपोनाशनरूपस्तस्यावलोपं तत्र हेतुं दृष्ट्वा भग
वतस्तं घटयितुं न शेकुरित्येतत्ख्यानमेकादशे भविष्यति ६ यत्र कामविजयी क्रोधोऽपि बिभेति तत्र कामो न प्रभवती
ति किं वक्तव्यमित्याह काममिति कृतिनः श्रीरुद्रप्रमुखाः रोषयुक्तया दृष्ट्या कामं दहंति रोषं त्वात्मानं दहंतमपि ते न दहंति क्रो
धेनाभिभूयंत इत्यर्थः ननु अहो सोऽयं रोषो यदंतरं यन्मध्यं प्रविशन्नलं बिभेति यद्वा यस्यांतः मनः कथंभूतममलं नि
र्मलं प्रविशन्निति ७

भा० टि० श्रीनृसिंहावतारमाह त्रैविष्टपादेवास्तेषामुरुभयं हंतीति तथा स भगवान् कथंभूतं रूपं भ्रमंत्यो भ्रुकुट्यो दंष्ट्राश्च
२७ यस्मिंस्तत् करालं वक्त्रं यस्मिंस्तत् दैत्येंद्रं स्फुरंतमारात्समीपमेव गदयोपलक्षितमभिपतंतं नखैर्विददार १४ हरिसं
स्तकावतारमाह अंतरिति युगलेन गजयूथस्यपतिः तीर्थरूपं श्रवो यस्य स तीर्थश्रवाः हे तीर्थश्रवः श्रवणेनैव मंगलं
नामधेयं यस्य १५ तद्वचनं श्रुत्वा शरणार्थिनं तं हस्ते शुंडायां प्रगृह्य किं कृत्वा नक्रस्य ग्राहस्य वदनं विनिपाट्य वि

त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रं दैत्येंद्रमाशु गदयाभिपतंतमा
रादूरौ निपात्य विददार नखैः स्फुरंतं १४ अंतःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरं
बुजहस्त आर्तः आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमंगलनामधेय १५ श्रुत्वा
हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः चक्रेण नक्रवदनं विनिपाट्य त
स्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार १६ ज्यायान् गुणैरवरजोप्यदितेः सुतानां लोकान् विचक्र
म इमान् यदथाधियज्ञः क्ष्मां वामनेन जगृहे त्रिपदछलेन याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः
१७

दार्य्य तस्मात् हृदनात् १६ वामनावतारमाह अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः
अवरजः कनीयान् अपि गुणैर्ज्यायान् ज्येष्ठः गुणानेवाह यद्यतः इमाँल्लोकान् विचक्रमे पादन्यासैः क्रांतवान् अथ प्रति
श्रुतानंतरमेव तत्र हेतुः बलेः क्ष्मां वामनरूपेण जगृहे नन्वीश्वरः स्वयं किमिति तथा चक्रे तत्राह याच्ञां विना धर्ममार्गे २७

हयग्रीवावतारमाह सत्रइति अथोइतिअथांतरे सएव साक्षाद्भगवान् ममब्रह्मणः सत्रेयज्ञे हयशीर्षा आसतपनीयं
सुवर्णंतद्वद्वर्णोयस्य छंदोमयः वेदमयः तद्विधेयायेमखास्तन्मयोमखमयइतिवापाठः मखैर्यजनीयाअखिला
देवतास्तदात्माचास्यश्वसतःश्वासंमुंचतः नस्तः नासापुटात् उशतीः उशत्यः कमनीयावेदलक्षणावाचोबभूवुः ११
मत्स्यावतारमाह मत्स्योभाविनावैवस्वतेनमनुनादृष्टः क्षोणीमयः पृथ्वीप्रधानस्तदाश्रयइत्यर्थः अतएवनि

सत्रेममासभगवान्हयशीरषाथोसाक्षात्सयज्ञपुरुषस्तपनीयवर्णः छंदोमयोमखमयो
खिलदेवतात्मावाचोबभूवुरुशतीःश्वसतोस्यनस्तः ११ मत्स्योयुगांतसमयेमनुनोपलब्धः
क्षोणीमयोनिखिलजीवनिकायकेतः विस्रंसितानुरुभयेसलिलेमुखान्मेआदायतत्रविज
हारहवेदमार्गान् १२ क्षीरोदधावमरदानवयूथपानामुन्मथतामृतलब्धयआदिदेवः
पृष्ठेनकछपवपुर्विदधारगोत्रंनिद्राक्षणोद्रिपरिवर्तकषाणकंडुः १२

खिलजीवनिकायानामाश्रयः मेमुखाद्विस्रंसितान्गलितान्वेदस्यमार्गान्वेदानादायतत्रयुगांतसलिले
विजहारहर्षेण १२ कूर्मावतारमाह क्षीरोदधौकछपवपुःसन्गोत्रंमथनार्थंमंदरगिरिंपृष्ठेनविधृतवान्
कदाअमृतलब्धयेक्षीराब्धिमथ्नतांसतांनिद्रायाक्षणइवसरभसेवीवायस्यसःनिद्रावसरःकुतस्तत्राह अद्रेः
परिवर्तःपरिभ्रमःसएवकषाणःकर्षणंघर्षणंसुखप्रदोयस्यांसाकंडूर्यस्यसः यद्वाअद्रिपरिवर्तएवकषः

धन्वंतर्य्यवतारमाह लोकेवतीर्य्य धन्वंतरिःसन् पुरुरुजां महारोगिणां नृणां नाम्नैव रुजो रोगान् हंति स्वयमेव कीर्त्तिरिति की
र्त्तिशयोक्तिः अमृतं मरणाभूत्यमायुर्यस्मात्सः अव अवरुन्ध पूर्वं दैत्यैः प्रतिरुद्धं यज्ञे भागं चावरुन्ध लभते स्वापरुद्धमिति पा
ठेप्यपमेवार्थः आयुर्विषयं वेदं चानुशास्ति प्रवर्त्तयति २१ परशुरामावतारमाह क्षत्रं क्षयायविधिना दैवेनोपभृतं संवर्द्धितं
नरस्तु वेषमर्पितमिति वा ब्राह्मणेभ्योद्रुह्यतीतितथा अतः उज्झितपंथावेदमार्गो येन अत एव नरकार्त्तिलिप्सुतीव्रैवं न

धन्वंतरिश्च भगवान्स्वयमेव कीर्त्तिर्नाम्नानृणां पुरुरुजां रुज आशु हंति यज्ञे च भागममृतायुरवावरुंध
आयुष्यवेदमनुशास्त्यवतीर्य्य लोके २१ क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरका २२
र्त्तिलिप्सुः उद्धंत्यसाववनिकंटकमुग्रवीर्य्यस्त्रिःसप्तकृत्व उरुधारपरस्वधेन २२ अस्मत्प्रसादसुमुखः
कलयाकलेश इक्ष्वाकुवंशअवतीर्य्य गुरोर्निदेशे तिष्ठन्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दश
कंधर आर्त्तिमार्छत् २३

नमवनेः कंटकतुल्यं क्षत्रमसौ महात्मा हरिरुद्धंति उत्पाटयति दीर्घतीक्ष्णधारेण परशुना २२ रामावतारमा
हत्रिभिः अस्माकं ब्रह्मादीनां प्रसादे सुमुखः कलया भरतादिरूपया सह कलामायातस्या ईशः गुरोर्दशरथस्याज्ञायां
तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवेश यस्मिन् विरोधं कृत्वा रावणो नाशं प्राप्तः २३ ॥ ऽऽ

ननु तर्हि यावज्ज्यापि चालनमनुचितमेवेत्याशंक्य ततोऽधिकं स्वमालोकादि दास्यामीत्याशयेनाह नवा नित्याहनार्थ इति यद्विबुधा
धिपत्यमिदानीं बलात्प्राप्तमयं दीयमानं चायं बलेः पुरुषार्थो न भवति किंतु अस्य तत आह आत्रेयः इति छेदः उरुक्रमस्य पादशौ
चं चरणक्षालनरूपाः आपः आ सर्वतो धृतवतः क शिखायां मूर्धनीत्यर्थः किंच मुक्तेनैव अरिनः शत्रोऽप्यंगा हे नारद प्रतिश्रुतं विनाऽन्यन्न
चिकीर्षितं कर्तुं नैच्छत् यस्तृतीयपादपूरणार्थं हरये आत्मानं देहमप्यभिमेने अंगीकृतवान् एवं सद्देहं त्रैलोक्यं प्रदत्तवतो
विबुधाधिपत्यमर्थो न भवतीत्यर्थः १८ हंसावतारमाह तुभ्यमिति भृशं विरुद्धेन भावेनात्युद्रिक्तया भक्त्या परितुष्टः सन् भक्ति

नार्थो बलेरयमुरुक्रमपादशौचमापः शिखाधृतवतो विबुधाधिपत्यं यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदा
त्मानमंग शिरसा हरयेऽभिमेने १८ तुभ्यं च नारद भृशं भगवान्विरुद्धभावेन साधु परितुष्ट उवाच योगं ज्ञानं च
भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरंजसैव १९ चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वंतरेषु
मनुवंशधरो विभर्त्ति दुष्टेषु राजसु दमं व्यदधात्स्वकीर्त्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः २०

योगं साधु यथा तथोवाच ज्ञानं चेति ज्ञानसाधनं किं तद्भागवतं नाम कथंभूतं तत्त्वमेव सतत्त्वमात्मतत्त्वदीपकं विरुद्ध
भावेनेति विशेषणस्य फलमाह यदिति १९ तत्तन्मन्वंतरावतारमाह चक्रमिति स्वतेजः निजं प्रभावमेव चक्रं सुदर्शनं वि
भर्त्ति चक्रवदप्रतिहतं प्रभावं बिभर्त्तीत्यर्थः तदेवाह मनुवंशपालकः सन् त्रयाणां लोकानां पृष्ठोपरि स्थिते सत्यलोके।
कनीयांस्वकीर्त्तिं विस्तारयन् राजसु दंडं विधत्ते २०

श्रीराधि० ग्रंथिह ०२

भा०टि०
२८

कृष्णावतारमाह भूमेरिति द्वाभ्यां सुरेतराणामसुराणां भूतानां राज्ञामंशभूता ये तेषां वरुथैः सैन्यैर्विमर्दितायाः भारेण पीडिताया क्लेशव्ययाय
कलया रामेण सह जातः सन् कोसौ जातः सितकृष्णौ केशौ यस्य भगवतः स एव साक्षात् सितकृष्णकेशत्वं शोभैव न तु
वयः परिणामकृतमविकारित्वात् यत्तु विष्णुपुराणे उज्जहारात्मनः केशौ सितकृष्णौ महामुने इति यच्च भारते स
चापि केशौ हरिरुद्बबर्ह एकं शुक्लमपरं चापि कृष्णं तौ चापि केशावाविशतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं
च तयोरेको बलभद्रो बभूव योसौ श्वेतस्तस्य देवस्य केशः कृष्णो द्वितीयः केशवः संबभूव केशो योसौ वर्णतः कृष्ण

भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः जातः करिष्यति ज
नानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबंधनानि २६ तोके न जीवहरणं यदुलूकिका
यास्त्रैमासिकस्य च पदा शकटोपवृत्तः यद्रिंगतांतरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जु
नयोर्न भाव्यं २७ उक्तः इति तत्तु न केशमात्रावताराभिप्रायं किंतु भारावतारणरूपं कार्यं कियदेतत्
मत्केशावेव तत्कर्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थं च केशोद्धरणमिति गम्यते अन्यथा तत्रै
व पूर्वापरविरोधापत्तेः कृष्णस्तु भगवान्स्वयमित्युक्तेश्च हिशब्दो ध्याहार्यः कथंभूतः परमेश्वरतया जनैरनुपलक्ष्यो
मार्गो यस्य तर्हीश्वरत्वे किं प्रमाणमतिमानुषकर्माणि यथान्यथानुपपत्तिरेवेत्याह आत्मनो महिमोपनिबध्यते अभि
व्यज्यते येषु तानि २६ एतदेव प्रपंचयति तोकेनेत्यादिना बालेन पूतनाया जीवहरणं यद्रिंगता जानुभ्यां गच्छता अंत्र

२४ २था
२८

यस्मैरामायोदधिमार्गंददौसपदिशीघ्रंहरोयथात्रिपुरंदिधक्षुस्तद्वदरिपुरंलंकांदग्धुमिच्छोःषष्ठीचतुर्थ्यर्थेयद्वाप
श्चमीयंदिधक्षोःरामात्त्रस्तंयद्वायंपश्चात्तेनागोकंपोयस्येतिकथंभूतंतदधिरूढंव्याप्तंयद्वयंतेनागोरूढंवेपःकंपोय.
स्यात्रहेतुःदूरेवर्त्तमानासुहृत्सीतातत्यानिमित्तभूतयामथितःक्षुभितोरोषस्तेनसुशोणमत्यंतरक्तंदृष्टिस्तयात्य
तंतप्यमानंमकराणामुरगाणांनक्राणांचचक्रंयस्मिन् २४ किंचयुद्धएवरणस्यवल्गतःस्थलस्पर्शेनरुगणमहत्वाये
महेंद्रवाहस्येएवतस्यदंतास्तैर्विडंबिताःस्वधवलिम्नाधवलीकृतास्तत्रदिक्पतिभिःप्रकाशितास्तस्यर्थःयाएवं

तस्मादद्रादुदधिरूढभयांगवेपोमार्गंसपद्यरिपुरंहरवद्दिधक्षोः दूरेसुहृन्मथितरोषसुशोणदृष्ट्या
तातप्यमानमकरोरगनक्रचक्रः २४ वल्गत्स्थलस्पर्शरुगणमहेंद्रवाहदंतैर्विडंबितककुब्जुषऊढ
हासंसद्योऽसुभिःसहविनेष्यतिदारहर्तुर्विस्फूर्जितैर्धनुषउज्जृम्भतोधिसेन्ये २५

स्तांककुभोदिशस्ताःजुषतेसेवतेपालयतीतितथातस्यदारहर्तूरावणस्य अहोमत्समःकोन्योस्तीतिम
हागर्वेणोढंप्राप्तंहासं असुभिःप्राणैःसहसद्यःशीघ्रंविनेष्यत्यपनेष्यतिकैःधनुषोविस्फू जितैःष्टंका
रघोषैरेवकथंभूतस्याधिसेन्येस्वपरसैन्ययोर्मध्येउच्चरतउत्कर्षेणविचरतःककुब्जुषरूढहासमितिपाठेदं
तैरुज्ज्वलितानांककुभांजयेनयोरूढहासःसंजातोगर्वस्तमपनेष्यतीत्यर्थः २५ ॥ ऽऽ ॥ ऽऽ ॥ ॥ श्री

भा० टि०
३०

दैवेंद्रप्रभृतिरिति पुरिव्यर्थः अनघे अमरद्विते एकस्मिन्नेव करे सलीलं यथा तथा महीध्रं गोवर्द्धनं धर्त्ता धारयिष्यत्युच्छि
लीध्रमुदंतछत्राकमिव सप्तवर्षीलीवयोयस्य सः ३३ निशि राकायो निशाकररश्मिभिः गौर्य्यो धवलायां वने क्रीडन् उन्मुक्तस्वानि मंजुला
निपदानि यस्मिंस्तत्वेन दायतं च दीर्घं मूर्छितं वालापविशेषयुक्तं गीतं तेनो द्दीपितः स्मरएव रुग्यासां तासां गोपीनामाहर्तुः शंखचूड
स्य शिरो हरिष्यति ३४ येच प्रलंबादयस्ते सर्वे हरिणा हेतुभूतेन नदीयं निलयमदर्शनं दर्शनायोग्यं वैकुंठमलं यास्यंति उत्तरे

गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेभिवर्षति पशून्कृपया रिरक्षुः धर्त्तोच्छिलीध्रमिव सप्तदिनानि सप्तव
र्षो महीध्रमनघैककरे सलीलं ३३ क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्छि
तेन उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य ३४ येच प्रलंबखरदर्दुरकेश्यरि
ष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः अन्येच साल्वकपिबल्वलदंतवक्रसप्तोक्षशंबरविदूरथरुक्मि
मुख्याः येच मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकैकयसृंजयाद्याः यास्यंत्यदर्शन
मलंबलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयं ३६ गणान्वयः खरो धेनुकः दर्दुर इव दर्दुरो बकः इभः कुवल
यापीडः कपिर्द्विविदः कुजो नरकः येच मृधे आत्तचापाः समितौ संग्रामे शालंते श्लाघंते समितिशालिनः ननु प्रलंबखरक
पिबल्वलरुक्मिमुख्याः बलभद्रेण निहताः कांबोजादयश्च भीमार्जुनादिभिः संबरः प्रद्युम्नेन यवनो मुचुकुंदेन ननु हरि
णा तत्राह बलपार्थभीम इत्यादयः व्याजाह्वयाः कपटनामानि यस्य तेन तत्प्रोत्साहणस्तुतेन दमिताः कालांतरे यास्यंती ३०
तिभावः एतच्च सर्वमपि कर्मदिव्यमिव तत्वान्यथानभाव्यमिति पूर्वेणैव संबंधः ३६ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

विषत्तोयपीतान् विषमयतोयस्यपीतंपानंयेषांतान् गोपान्पशूंश्चकृपादृष्टिसुधावृष्ट्याजीवयिष्यतीतियमुना
यांक्रीडन्नुरगंकालीयमुच्चारयिष्यति तंच्युत्क्रम्येतस्याह्रदान्निःसुहृद्येनिर्विषयत्वायातिविषवीर्येणविलोला
जिह्वायस्य २८ दिव्यमलौकिकंकर्मवितिलोकोक्तिरुन्नेष्यत्युद्धरिष्यतिमुंचिष्यतीष्मतसंबंधिनिवने
शुष्केइत्यर्थः अतोदावाग्नेर्हेतोरेवसितेनोनिश्चितेऽन्तकालोयस्यतं सबलःसरामोऽनधिगम्यंदुर्ज्ञेयंवीर्यं

यद्वैव्रजेव्रजपशून्विषतोयपीतान्पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या तच्छुद्धयेतिविषवीर्यविलो
लजिह्वमुच्चाटयिष्यदुरगंविहरन्ह्रदिन्यां २८ तत्कर्मदिव्यमिवयन्निशिनिःशयानंदावाग्निनाशु
चिवनेपरिदह्यमाने उन्नेष्यति व्रजमतोवसितान्तकालंनेत्रेपिधाप्यसबलोऽनधिगम्यवीर्यः २९ गृह्णी
तयद्यदुपबंधममुष्यमातासुल्वंसुतस्यनतुतत्तदमुष्यमाति यज्जृंभतोऽस्यवदनेभुवनानिगोपीसंवीक्ष्य
शंकितमनाःप्रतिबोधितासीत् ३० नंदंचमोक्ष्यतिभयाद्वरुणस्यपाशाद्गोपान्बिलेषुपिहितान्मयसूनुनाच
श्रह्न्याहृतंनिशिशयानमतिश्रमेणलोकंविकुंठमुपनेष्यतिगोकुलंस्म ३१
यस्यसः तत्रनिशिनिःशयानमितिकालियदमनेरात्र्यांयमुनातीरेनेत्रेपिधाप्यपिहितेकारयित्वेतिमुंजाटव्यामितिशेषं २९
उपबध्यतेऽनेनेत्युपबंधंतत्साधनंसुल्वंदामामुष्यमातायशोदायद्गृहीतममुष्यनमाति बंधनंसमतंनभवतिनपूर्यतेतद
त्यर्थः गोपीयशोदासंवीक्ष्यदृष्ट्वाप्रतिबोधितानिजैश्वर्यज्ञापितासीदितियत्तच्चकर्मदिव्यमेवेतिसर्वत्रपूर्वेणैवान्वयः ३०
वरुणस्यपाशाद्बद्धंतस्मान्मोचयिष्यति मयसूनुनाव्योमनाम्नाऽहृतंनिशिशयानमितिचवैकुंठप्राप्तिसाधनानुष्ठा

नाम्नो दर्शितः उपनेष्यति प्रापयिष्यति गोकुलवासि
जनं नंदस्य चाश्चर्यं ३१

इदं मयासंक्षेपेणोक्तं विस्तरेण तु वक्तुं न कोपि समर्थ इत्याह पृथिव्या परिमाणान्यपि यो विममे गणितवान् तादृशोपि को
नु विष्णोर्वीर्य्यगणनां कर्त्तुमर्हति कथंभूतस्य यो विष्णुः त्रिपृष्ठं सत्यलोकं च स्कंभ धृतवान् तस्य किमिति च स्कं
भ यस्मात् त्रैविक्रमे अस्खलता प्रतिघातशून्येन स्वरहसा स्वपादवेगेन त्रिसाम्यरूपं सदनमधिष्ठानं प्रधानं तस्मादा
रभ्य उरु अधिकं कंपयानं कंपमानं कंपेन त्राणं यस्येति वा अतः कारणाच्च स्कंभ आत्रिपिष्टमिति वा छेदः सत्यलोकम
भिव्याप्य पयः सबंधितवान् इत्यर्थः तथा च मंत्रः विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि यो अस्कंभायदुत्त

विष्णोर्नु वीर्य्यगणनां कतमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि चस्कंभ यः स्वरहसास्खलता त्रि
पृष्ठं यस्मात्त्रिसाम्यसदनादुरुकंपयानं ३९ नांतं विदाम्यहममी मुनयोग्रजास्ते मायाबलस्य पुरुषस्य
कुतोपरे ये गायन्गुणान्दशशताननआदिदेवः शेषोधुनापि समवस्यति नास्य पारं ४०

रं सधस्थं विचक्रमाणस्त्रेधोरुगाय इति अस्यार्थः विष्णोर्नु वीर्याणि कं प्रवोचं कः प्रावोचदित्यर्थः यः पार्थिवानि र
जांस्यपि विममे सोपि यो विष्णुः त्रेधा विचक्रमाणः त्रिविक्रमं कुर्वन् उत्तरं लोकं अस्कंभायत् अवष्टब्धवान् कथंभूत
सधस्थं सहस्थस्य सधादेशः तिष्ठंतीति स्थाः तत्र स्थैर्देवैः सह वर्त्तमानमित्यर्थः ३९ एतत्प्रपंचयति नांतमिति पुरुष
स्य यन्मायाबलं तस्यांतं न विदामि न वेद्मि दशशतान्याननानि यस्य सोपि अस्य गुणान् गायन्नधुनापि पारं न समवस
ति न प्राप्नोति ४०

व्यासावतारमाह अनुयुगंमीलितासंकुचिताधीर्येषांस्तोकमल्पमायुर्येषांतेषांस्वनिगमःस्वकृतोवेदराशिर्वतअहोदूरेपारंयस्ये
तिदुर्गमःस्यादेवमवमृश्यसत्यवत्यामाविर्भूतःसन्सएवहरिःविटपशःशाखाभेदेन ३७ बुद्धावतारमाह देवद्विषांदैत्यानांनिष्ठितानांना
नितरांस्थितानांमयेनचपूर्भिःपुरीभिरदृश्यतूर्भिरलक्ष्यवेगाभिर्मतेर्विमोहोयोग्यतात्यागाययस्मात्तेःप्रलोभश्चायुक्तोस्वीका
रोयस्मात्तंपाषंडवेषंविधायतेभ्योउपधर्मंपाषंडधर्मंस्वार्थिभ्यःबहुभाषिष्यतइत्यर्थः ३८ कल्क्यवतारमाह यर्हियदासतामप्या

कालेनमीलितधियामवमृश्यनृणांस्तोकायुषांस्वनिगमोवतदूरपारः आविर्हितस्त्वनुयुगंसहिसत्यवत्यांवे
दद्रुमंविटपशोविभजिष्यतिस्म ३७ देवद्विषांनिगमवर्त्मनिनिष्ठितानांपूर्भिर्मयेनविहिताभिरदृश्यतूर्भिः लोका
न्घ्नतांमतिविमोहमतिप्रलोभंवेषंविधायवहुभाष्यतऔपधर्म्यं ३८ यर्ह्यालयेष्वपिसतांनहरेःकथाःस्युः
पाषंडिनोद्विजजनावृषलानृदेवाः स्वाहास्वधावषडितिस्मगिरोनयत्रशास्ताभविष्यतिकलेर्भगवान्युगां
ते ३९ सर्गेतपोहमृषयोनवयेप्रजेशाःस्थानेचधर्ममखमन्वमरावनीशाः अंतेत्वधर्महरमन्युवशासुरा
द्यामायाविभूतयइमाःपुरुशक्तिभाजः ४०

लयेषुगृहेष्वपिवैदिकाःपाषंडिनःस्युःशूद्राश्चराजानःस्युस्तदाकल्किरूपेणकलेःशास्ताभविष्यति अत्रब्रह्मनारदसंवादात्प्रा
वतारास्तु २ गभाविनोवराहादयःमन्वंतरांभूताभाविनश्चधन्वंतरिपरशुरामौतदावर्तंतेश्रीरामादयस्तुभाविनः तत्रतुकेचिद्भूतादितिद्रष्ट
व्यादसद्रष्टव्यं ३९ सृष्ट्यादिकार्यभेदेनमायागुणावतारविभूतीराह सर्गइति स्थानेस्थितौमखोविष्णुःधर्मश्चमखश्च
मनवश्चामराश्चअवनीशाश्चअंतेसंहारेहरोरुद्रःमन्युवशाःसर्पाःवहुशक्तिधारिणोभगवतइमाविभूतयः ४०

भा० टि० किं तद्भगवद्रूपं यस्मिन्मनो धारणं विधाय मायां तरंतीत्यपेक्षायामाह शश्वदिति द्वाभ्यां यद्ब्रह्मेति विदुर्मुनयः तद्वै भग
३२ वतः स्वरूपं किं तद्ब्रह्म तदाह अजस्रं नित्यं च तत्सुखं च विशोकं चेति अजस्रसुखत्वे हेतुः शश्वत्प्रशान्तं अतो नित्य
सुखरूपं विशोकत्वे हेतुः अभयं कुतः यतः समं भेदशून्यं अतोऽभयं द्वितीयाद्वै भयं भवतीति श्रुतेः नन्वेतत्कुतः यतः प्रतिबो
धमात्रं ज्ञानैकरसं ननु ज्ञानस्यापि नीलपीताद्याकारेण चक्षुरादिकरणभेदेन च भेदो दृश्यते न शुद्धं निर्मलं न तु दर्शि
तविषयकरणोपरागरूपो मल इत्यत आह सदसतः परं विषयकरणसंबंधशून्यं वृत्तेरेव तदुपरागो न ज्ञानस्येति भावः न
नु तथापि ज्ञातृज्ञानयोः सह भेदः स्यात् न आत्मतत्त्वं आत्मनो ज्ञातुः स्वरूपमेव तत्ततो न भिन्नं ननु च तत्त्वोपनिषदं पुरुषं पृच्छा

२१ शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं शब्दो न यत्र पुरुकारकवान् क्रियार्थो
माया परैत्यभिमुखे च विलज्जमाना तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकं ४७

मीति शब्दबोध्यत्वप्रतीतेः कुतो बोधरूपत्वं तत्राह शब्दो न यत्रेति आरोपिते निवृत्तावेव शब्दस्य व्यापारो न तद्बोध इत्यर्थः ।
ननु च भवतु नाम निरस्तभेदं ज्ञानरूपत्वाद्विशोकत्वं सुखस्य तु नानाकारकसाध्यक्रियाफलत्वात् कथमजस्रसुखत्वं विशो
कं साध्यः क्रियार्थः तत्साध्यं आप्यविकार्य्यसंस्कार्य्यत्वरूपं चतुर्विधं क्रियाफलं नास्ति इंद्रियैर्ज्ञानांशाभिव्यक्तिरेव क्रियाभिर
नावृताभिव्यक्तिमात्रं क्रियते नोत्पत्त्यादिकमिति भावः ननूत्पत्त्याद्यभावेऽपि मलापाकरणेन विकार्य्यत्वं स्यादेव व्रीहीणा
मिव तुषापाकरणेनेत्याशंक्याह मायाभिमुखे स्थातुं विलज्जमानेव यस्मात् परैति दूरतोऽपसरति ४७ ॥ ऽऽ ॥ ३१

यदिन केपि विदंति तर्हि किं यं मुच्येरन् न तत्कृपयैवेत्याह येषामिति दययेत् दयां कुर्यात् तेच यदि निष्कपटं आश्रितच
रणा भवंति ते दुस्तरां देवमायां अतितरंति चकारात् मायावैभवं विदंति च विदंति च अयेत्तिवापोवः प्रत्यक्तमेव तेषामा
यातरणमित्याह नैषामिति श्वशृगालानां भक्ष्ये देहे ४१ अंतज्ञानाभावेपि मायेयमिति ज्ञानं तत्कृपया वक्तुं नामस्वीया
ह वेदाहमिति त्रिभिः यूयमिति सनकादीन् नत भोव्याय यक्तत्वं दैत्यवर्यः प्रह्लादः मनुः स्वायंभुवः तस्य पत्नी सेतिरूपा च त

येषां स एव भगवान् दययेदनंतः सर्वात्मनाश्रितपदो यदि निर्व्यलीकं ते दुस्तरामतितरंति च देवमायां
नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ४१ वेदाहमंग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यव
र्यः पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिर्ऋभुरंग उत ध्रुवश्च २ इक्ष्वाकुरैलमुचुकुंदविदेह
गाधिरघ्वंबरीषसगरा गयनाहुषाद्याः मांधात्रलर्कशतधन्वनुरंतिदेवा देवव्रतो बलिरमूर्त्तरयो दिलीपः ३
सौभर्युतंकशिबिदेवलपिप्पलादाः सारस्वतोद्धवपराशरभूरिषेणाः येन्ये विभीषणहनूमदुपेन्द्रदत्तपार्था
र्ष्टिषेणविदुरश्रुतदेववर्याः ४२ ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः यद्यद्भु
तक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ४३

हालमुनाः पुत्रौ कन्याश्च प्राचीनबर्हिषो वि
सर्गलोपश्छांदसः शतधनुः अनुश्च संधिरार्षः रंतिदेवाः इति पाठः सुगमः एकपद्येन एते सहितो देवव्रतः इत्यर्थः उपेन्द्रदत्तः
मुकः विभीषणादयो वर्या मुख्या येषां ते ४२ किं बहुना सत्संगेन सर्वेपि विदंतीत्याह ते वा इति अद्भुतः क्रमः पादन्यासो यस्य हि

स्तत्परायणास्तद्भक्ताः तेषां शीले शिक्षा येषां ते यदि भवंति न हि ते
पि विदंतीत्यर्थः श्रुते भगवतो रूपे धारणा मनोनियमनं येषां ते विद
तीति किमु वक्तव्यम् ४३

अध्यायत्रयस्यार्थमुपसंहरति सोयंतेसमासेन संक्षेपेणाभिहितः तमेवाह सदसत्कार्यंकारणं च हरेरन्यन्नभवति न
तु हरेस्तद्व्यतिरेकेण तत्कृतविकारप्रसंगः स्यात् न अन्यस्मात् कारणभूतो हरिः कार्याद्व्यतिरिक्त इत्यर्थः ४७ अयं च वि
भूतीनां संग्रह उदितः ४८ यथा वर्णितेन नृणां भक्तिर्भविष्यत्येवं संकल्प्य संचिंत्य तथाह हरिलीलाप्राधान्येन श्रीभागव

सोयं तेभिहितस्तात भगवान् विश्वभावनः समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ४७ इदं भागवतं
नाम यन्मे भगवतोदितं संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु ४८ यथा हरौ भगवति नृणां भक्तिर्भवि
ष्यति सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय ४९ मायां वर्णयतोमुष्य ईश्वरस्यानुमोदतः शृण्व
तः श्रद्धया नित्यं माययात्मा न मुह्यति ५० ॥ इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे ब्रह्मनारदसंवादे
सप्तमोध्यायः ॥ ७ ॥ राजोवाच ॥ ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेगुणस्य च यस्मै यस्मै यथा प्रा
ह नारदो देवदर्शनः एतद्वेदितुमिच्छामि तत्त्वं वेदविदांवर १ तं वर्णय न तु भक्तिरसविघातेन केवलं तं

त्वमित्यर्थः ४९ ननु लीला मायाश्रया किं तद्वर्णनेनेत आह मायामिति ५० ॥ इति द्वितीये सप्तमः ॥ ७ ॥ अष्टमे
देहसंबंधमाक्षिपन्नीशजीवयोः बहून्परीक्षिदपृच्छत् पुराणार्थान्बुभुत्सितान् तमेव विपुलीकुर्वित्युक्तं त
देव विपुलीकरणं पृच्छति ब्रह्मणेति त्रिभिः अगुणस्य गुणातीतस्यापि देवदर्शनं यस्य सः १ ॥ ऽऽ ॥ ऽऽ ३३

तस्मादेवंभूतेभगवतिनियमितमनसांकृतार्थोनांनकिमपिकृत्यमस्तीत्याह सध्र्यंचतीतिसध्र्यक्सहचरंम
नःयंप्रतिनियम्ययस्मिन्स्थिरीकृत्ययतयःयत्नशीलाःकर्तृभिदःतन्निरासोऽकर्त्तृतत्रहेतिंसाधनंजह्युःत्यजेयुः
अनुपयोगात्तन्नाद्रियंतइत्यर्थः उपयोगाभावे नसाधनानादरेदृष्टांतः निपीयतेस्मिन्नितिनिपानंकूपःतस्यखनि
त्रंखननसाधनंयथास्वराट स्वयमेवपर्जन्यरूपेणविराजमानइंद्रोनादत्तेनहत् यद्वास्वेनैवराजतइतिस्वराट्दरि
द्रःसयथाइंद्रःसमृद्धःसेवकर्मकारदशायांगृहीतंनिपानखनित्रंजहातितद्वदित्यर्थः ४५ एवंभावदजेत्वस्त
त्वंविशोकंब्रह्मैवभगवतःस्वरूपंतत्प्राप्तानांचप्राप्यकृत्यंवानकिंचिदस्तीत्युक्तं इदानींततःप्राक्तसएवसर्वफल

सध्र्यङ्नियम्ययतयोयमकर्तृहेतिंजह्युःस्वराडिवनिपानखनित्रमिंद्रः ४५ सत्त्वाश्रयसामपिविभुर्भ
गवान्यतस्यभावस्वभावविहितस्यसतःप्रसिद्धिः देहेस्वधातुविगमेनुविशीर्यमाणेव्योमेवतत्रपुरु
षोनविशीर्यतेऽजः ४६

तो २

ऽतःसर्वकर्मप्रवर्त्तकइत्याह सत्त्वाश्रयसांफलानांविभुःदातापि तत्रहेतुःभावानांब्राह्मणादीनांस्वभावैःशमदमादिभिः
विशेषेणविहितस्यसतःशुभस्यकर्मणोयतःप्रवर्त्तकात्प्रसिद्धिः यद्वा भावानांमहदादीनांस्वभावैःशमदमादिभिर्वि
मदमादिभिर्हितस्यसतःकार्यस्यप्रसिद्धिःसएवस्वर्गादीनांदातेत्यर्थः ननुकर्मकर्तुर्मृतस्यकथंस्वर्गादिभावेनपरिणामेन
फलंस्यात्तत्राह स्वारंभकधातूनांभूतानांविगमेवियोगेसतिअन्वनुविशीर्यमाणेपिदेहेतत्रस्थंव्योमेवस्तेनसहनविशीर्य
ते यतःअजःतेनसहनजातःतस्यपुरुषस्यश्रेयसांप्रभुरित्यर्थः ४६

भा० द्वि० यस्मादसावीश्वरः सोप्येतत्तुल्यदेहवान् प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदिति सार्द्धेन लोकानां संस्थानं र
३४ चना तदेव लक्षणं स्वरूपं यस्य एतत्पद्मं यस्योदरादासीत् असावीश्वरः इयत्तायुक्तैः स्वपरिमितैरवयवैरयं लौकिकः पुरुषो
यावान् यत्संस्थो लोकावयवयुक्तः संस्थावान् अवयववानिव च प्रोक्तः अतः को विशेषस्तस्येति ७ अवश्यं च विशेषो वाच्य इत्याह
अजो ब्रह्मा भूतानां व्यष्ट्युपाधीनामात्मा नियंता समष्ट्युपाधित्वात् येन च अनुग्रहात्तस्य रूपं ददर्श ददृष्टवान् एतच्चैतस्याधि

आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणं यावानयं वै पुरुष इयत्तावयवैः पृथक् तावानसाविति प्रोक्तः सं
व२ स्थावयववानिव ७ अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ८ स
चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः ९ पुरुषाव
यवैर्लोकाः सपालाः पूर्वकल्पिताः लोकैरमुष्यावयवाः सपालैरिति शुश्रुम १० ॥ ॥ ॥ ॥

द्रष्टुरीश्वरस्य कुतः तस्य सर्वाखिलात्मनः सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदित इत्यादि चोक्तमनुपपत्ते अत्रे
तस्यैवं भविष्यति ८ प्रश्नांतरमाह स चापीति यत्र शेते येन रूपेणावतिष्ठते विश्वस्य स्थित्यादयो यस्मात् एवमादि
प्रश्नानां तत्त्वतोऽर्हस्यनुवर्णितुमिति सर्वत्र क्रियासंबंधः ९ प्रश्नांतरमाह पुरुषस्यावयवैः पूर्वकल्पिताः यस्येहाव
यवैर्लोकान् कल्पयन्तीत्यादौ लोकैश्चामुष्यावयवा इति पातालमेतस्य हि पादमूलमित्यादौ च त्वन्मुखाच्छ्रुतवंतो वयम् १० ३४

निःसंगं मनः श्रीकृष्णे निवेश्येति प्रयत्नो दर्शितः २ सोपि श्रद्धया श्रवणेनानावश्यक इत्याह श्रृण्वत इति स्वप्रयत्नं विना भगवा
न्स्वयमेव हृदि विशति ३ भावसरोरुहं हृदयकमलं प्रविष्टः अतः तं सर्वं मलं धुनोति सलिलस्येति दृष्टांतरव्या
जिम्ब्रलादिना कुंभस्य जले शोधिते तदेव केवलं शुद्धं भवति न तु नद्यां तडागादिगतं स च मलः कुंभस्यांतस्तिष्ठत्येव न तु स
र्वथा विलीयते अत एव किंचिच्चलनेन पुनः क्षुभ्यति च एवं तपोदानादिप्रायश्चित्तेन सर्वथा सर्वेषां सर्वं पापं धुनोति किं
तु सावशेषं तच्च कस्यचिदेव किंचिदेव हृदि प्रविष्टमात्रस्तु श्रीकृष्णः सर्वेषां सर्वं पापं निःशेषं हरतीत्यनेन दृष्टांतेनोक्तं

हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः कथयस्व महाभाग यथाहमखिलात्मनि कृष्णे निवेश्य निः
संगं मनस्त्यक्ष्ये कलेवरं २ श्रृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितं कालेन नातिदीर्घेण भगवान्वि
शते हृदि ३ प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहं धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ४
धौतात्मा पुरुषः कृष्णपादमूलं न मुंचति मुक्तसर्वपरिक्लेशः पांथः स्वशरणं यथा ५ यदधातुमतो ब्रह्म
न्देहारंभोस्य धातुभिः यदृच्छया हेतुना वा भवंतो जानते यथा ६ शलिलस्य मलं यथा शरदिति ४ ननु

अकृतार्थी भवतीत्याह धौतात्मेति धौतात्मा निष्पापः मुक्ताः सर्वे रागद्वेषादयः परिक्लेशा येन पांथः प्रवासादागतः स्वशरणं
स्वगृहं यथा न मुंचति तद्वत् ५ तदेवं श्रवणोत्सुकमाविष्कृत्य संदिग्धानर्थान्पृच्छति यदधातुमतः धातवो भूतानि
तत्संबंधशून्यस्यास्य लौकिकस्यात्मनः धातुभिर्देहारंभ इति यत् एतत् किं यदृच्छया निर्निमित्तं हेतुना वा कर्मादिना भवं

५२

भा० द्वि० सविशेषः वर्णाश्रमनिवंधनः श्रेणीनां तत्तद्व्यवसायोपजीविनां व्यवहारनियमलक्षणो धर्मः राजर्षीणां प्रजापाल
३५ नाधिकारिणां कृच्छ्रेषु आपत्सु जीवतां सर्वेषां १७ तत्त्वानां प्रकृत्यादीनां परिसंख्यानं संख्या लक्षणं स्वरूपं हेतुलक्ष
णं तत्तत्कार्यहेतुत्वेन लक्षणमित्यर्थः पुरुषाराधनस्य विधिः देवपूजाप्रकारः अष्टांगयोगस्य च विधिः १८ योगेश्व
राणामैश्वर्यं अणिमादीनां अर्चिरादिगतिः लिंगशरीरस्य भंगः प्रलयः वेदा ऋग्वेदादयः उपवेदा आयुर्वेदादयः

नृणां साधारणो धर्मः सविशेषश्च यादृशः श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवतां १७ तत्त्वानां
परिसंख्यानं लक्षणं हेतुलक्षणं पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च १८ योगेश्वरैश्वर्यग
तिर्लिंगभंगस्तु योगिनां वेदोपवेदधर्माणामितिहासपुराणयोः १९ संप्लवः सर्वभूतानां विक्र
मः प्रतिसंक्रमः इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः २० यश्चानुशायिनां सर्गः पाषंडस्य
च संभवः आत्मनो वंधमोक्षौ च व्यवस्थानं स्वरूपतः २१

धर्मो धर्मशास्त्राणि तेषां इतिहासपुराणयोश्च गतिः स्वरूपं १९ संप्लवः अवांतरप्रलयः यद्वा सम्यक्प्लव उद्भवः
विक्रमः स्थितिः प्रतिसंक्रमो महाप्रलयः इष्टं वैदिकं कर्म पूर्तं स्मार्तं वापीकूपतडागादि देवतायतनानि च अन्नप्र
दानमारामः पूर्तमित्यभिधीयते इति तत्र च काम्यानामग्निहोत्रादीनां विधिः त्रिवर्गस्य धर्मार्थकामस्य विधिः अविरोधप्र
कारः २० अनुशायिनां लीनोपाधीनां जीवानां आत्मनो जीवस्य व्यवस्थानं वंधमोक्षातिरिक्तस्वरूपेणावस्थानं २१ ३५

एवंसंदेहविपर्ययाभ्यांपृष्टं इदानीमज्ञातान्बहूनर्थान्पृच्छति यावानित्यादिना कल्पोमहान्विक ल्पोऽवांतरः भूतादि
शब्दोयस्मात् यस्यवाचकइतिवा सतःस्थूलदेहाभिमानिनोमनुष्यपितृदेवतादेः आयुषःप्रमाणं ११ अनुमानकारणंपृष्ट्वा
विशेषंपृच्छति कालस्येति अनुगतिःप्रवृत्तिः कर्मगतयःकर्मप्राप्याणिस्थानानि यादृशीर्यादृश्यः १२ गुणानांसत्वा
दीनांपरिणामंदेवादिमिच्छतांगुणिनांजीवानांमध्येयस्मिन्परिणामेकर्मणांपुण्यपापानांसमावायःसमुदायः

यावान्कल्पविकल्पोवायथाकालोनुमीयते भूतभव्यभवच्छब्दआयुर्मानंचयत्सतः ११ काल
स्यानुगतिर्यातुलक्ष्यतेऽण्वीबृहत्यपि यावत्यःकर्मगतयोयादृशीर्द्विजसत्तम १२ यस्मिन्कर्मसमा
वायोयथायेनोपगृह्यते गुणानांगुणिनांचैवपरिणाममभीप्सतां १३ भूपातालककुब्व्योमग्रहनक्ष
त्रभूभृतां सरित्समुद्रद्वीपानांसंभवश्चैतदोकसां १४ प्रमाणमंडकोशस्यबाह्याभ्यंतरभेदतः
महतांचानुचरितंवर्णाश्रमविनिश्चयः १५ अवतारानुचरितंयदाश्चर्यतमंहरेः युगानियुग
मानंचधर्मोयश्चयुगेयुगे १६

केनकर्मसमुदायेन कथंकृतेन कोधिकारीदेवादिभावंप्राप्नोतीत्यर्थः १३ भूरादीनांसंभवः एतानिओकां
सियेषांप्राणिनांतेषांचसंभवः यथेतिसर्वत्रानुषंगः १४ वर्णानामाश्रमाणांचविनिश्चयः तत्रतत्स्वभावैर्निर्द्धा
रः १५ युगे युगेप्रतियुगेयोधर्मः यच्चहरेरवतारानुचरितं उदाहर्तुं अर्हसीतिसर्वत्रानुयोज्यम् १६

भा० द्वि० ३८ राजप्रश्नोत्तरं वक्ष्यन् ब्रह्मणो हरिणोदितं कथयामास नवमे शुको भागवतं पुनः तत्र यत्तावदुक्तं यद्धातुमत इत्यनेन जीवस्य कथं
देहसंबंध इति तत्रोत्तरमाह आत्मनो हरेर्मायामंतरेण अनुभवरूपस्यात्मन अर्थेन दृश्येन देहादिना संबंधः अंजसा तत्त्वतो
न घटेत अत्र हेतुः परस्येति स्वप्नद्रष्टुर्यथा स्वप्नदेहसंबंधो न घटते तद्वत् १ संसारोपि माययैवेत्याह बहुरूपः बाल्ययुवादिरू
पः देवनरादिरूपश्च आभाति गुणेषु देहादिषु २ अत एव भक्तियोगेन तन्निरासे सति मोक्षोपि घटत इत्याह यर्हीति वाशब्द
एवार्थे स्व एव महिम्नि यदा रमेत तदेवाह कालमाययोः पुरुषप्रकृत्योः परस्मिन् तदा उभयं अहं ममेति च त्यक्त्वा उदास्ते
पूर्णे स्वरूपेणावतिष्ठते तदुक्तं यया संमोहितो जीव आत्मानं त्रिगुणात्मकं परोपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते अनर्थो

श्रीशुक उवाच ॥ आत्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा १ बहु
रूप इवाभाति मायया बहुरूपया रममाणो गुणेष्वस्या ममाहमिति मन्यते २ यर्हि वाव महिम्नि स्वे परस्मि
न्कालमाययोः रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयं ३ आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम् ब्रह्म
णे दर्शयन् रूपमव्यलीकव्रतादृतः ४

पशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो व्या
सश्चक्रे सात्वतसंहितामिति ३ यच्चोक्तं परमेश्वरस्यापि देहसंबंधाविशेषात् कथं तद्भक्त्या मोक्षः स्यादिति आसीद्यदुदरा
त्पद्ममित्यादिना तत्राह आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं तद्भवत्येव किं तर्हि यत्तपआदिना स्वभजनेन भगवान् ब्रह्मणे आह
किं कुर्वन् ऋतं सत्यं चिद्घनं रूपं दर्शयन् दर्शने हेतुः अव्यलीकेन व्रतेन तपसा आदृतः सेवितः सन् अयं भावः जीवस्याविद्य
या मिथ्यारूपदेहसंबंधः ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव इति महान् विशेषः अतस्तद्भजनान्मोक्षोपप ३८

उदास्ते प्रलये २२ चशब्दादपृष्टमपि प्रमाणं सम्यग्ज्ञाता यतस्त्वं ब्रह्मनारदव्यासक्रमेण संप्रदायोऽस्तीति सामान्यन्याये
नाह परे चेति यद्वा त्वदन्ये प्रायशो गतानुगतिका एवं न तत्त्वविद इत्याह परे चेति २४ ननु तवानशनं द्विजकोपाभ्यां व्याकुल
स्य कुतः श्रवणं तत्राह नेति न परायंति नापगच्छंति न व्याकुलीभवंतीत्यर्थः अच्युतकीर्तिपीयूषं पिबतः २५ उपामंत्रितः पृष्टः

५७ यथात्मतंत्रो भगवान्विक्रीडत्यात्ममायया विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः २२ सर्वमेतच्च भ
गवन्पृच्छतो मेऽनुपूर्वशः तत्त्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने ॥२३॥ अत्र प्रमाणं हि भवान्परमेष्ठी य
थात्मभूः परे चेहानुतिष्ठंति पूर्वेषां पूर्वजैः कृतं ॥२४॥ न मेऽसवः परायंति ब्रह्मन्ननशनादमी पिबतो
च्युतपीयूषमन्यत्र कुपिताद्द्विजात् २५ ॥सूत उवाच॥ स उपामंत्रितो राज्ञा कथायामिति सत्पतेः॥
ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि २६ प्राह भागवतं नाम पुराणं ब्रह्मसंमितं ब्रह्मणे भगवत्प्रो
क्तं ब्रह्मकल्प उपागते २७ यद्यत्परीक्षिदृषभः पांडूनामनुपृच्छति आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्र
मे २८ ॥इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे प्रश्नविधिर्नामाष्टमोऽध्यायः ॥ ८ ॥

संस्थासौ यतिश्चतस्य २६ ब्रह्मकल्पे सृष्ट्युपक्रमकल्पे भागवताख्याने नैव प्रश्नस्योत्तरं दातुमुपक्रांतवानित्यर्थः
२७ पांडूनामृषभः श्रेष्ठः आनुपूर्व्येणेति प्रश्नावक्रमोऽत्र विवक्षितः न प्रश्नक्रमः ॥२८॥ इति द्वितीयेऽष्टमः ॥ ८ ॥

भा० द्वि० ३१ तत्रस्रसः अखिलानां लोकानां तापनं प्रकाशकं तपः अतएव तस्मै हृष्टवान् तपस्तपेत्यस्य वचसोऽर्थः अमोघं दर्शनं यस्य जितः
अनिलः आत्मा मनश्च येन विजितान्युभयेंद्रियाणि ज्ञानकर्मात्मकानि येन तपता तपश्चरतां मध्ये तपीयान् अति
शयेन तपस्वी ८ तस्मै ब्रह्मणे स्वलोकं वैकुंठाख्यं परं श्रेष्ठं न यत्परं परमुत्कृष्टं अन्यन्नास्ति तमेव लोकमनुवर्णयति
पंचभिः व्यपेताः संक्लेशादयो यस्मात् स्वदृष्टवद्भिः सम्पुण्यवद्भिः यद्वा स्वस्य दृष्टं दर्शनमस्ति येषां आत्मवद्भिरित्य

दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेंद्रियः अतप्यत स्माखिललोकतापनं तपस्तपी
यांस्तपतां समाहितः ८ तस्मै स्वलोकं भगवान् सभाजितः संदर्शयामास परं न यत्परं व्यपेतसंक्लेशविमोह
स्क० ९ साध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतं ९ प्रवर्त्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः न यत्र मा
या किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः १० श्यामावदाताः शतपत्रलोचनाः पिशंगवस्त्राः सुरुचः सुपे
शसः सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः प्रवालवैदूर्यमृणालवर्चसः परि
स्फुरत्कुंडलमौलिमालिनः ११

धिः ९ ताभ्यां मिश्रं सत्त्वं च न प्रवर्त्तते किंतु शुद्धमेव सत्त्वं का
लविक्रमो नाशः अपरे रागलोभादयो न संतीति किमुत वक्तव्यं अनुव्रताः पार्षदाः १० श्यामाश्च अवदाताश्च उज्वलाः
पद्मनेत्राः पीतांबराः सुरुचः अतिकमनीयाः सुपेशवर्चसः अतिसुकुमाराः उन्मिषंत इव प्रभावंतो मणिप्रवेकाः
मण्युत्तमा येषु तानि निष्कपदकान्याभरणानि येषां ते सुवर्चसः अतितेजस्विनः प्रवालादिवत्वर्चो वर्णो येषां ते परि

३१

भगवद्भजनादेव तत्त्वज्ञानमित्येतत्प्रपंचयिष्यन् ब्रह्मणोपि तत्त्वज्ञानं तत्प्रसादादेवेति दर्शयितुमितिहासमाह सद
त्यादिना परो गुरुः भक्तिरूढस्योपदेष्टा स्वधिष्ण्यं पद्मं आस्थाय अधिष्ठाय तस्याधिष्ठानान्वेषणाय पूर्वं जले निमग्नः पश्चा
त्परावृत्य स्वधिष्ण्ये स्थित इत्यर्थः ऐक्षत तत्कथं स्रष्टव्यमित्यालोचितवान् तां दृशं प्रज्ञां अत्र सृष्टिविषये संमतां अव्यभि
चारिणीं यया दृशा विधिः प्रकारः ५ स सृष्टिं चिंतयन् कदाचिद्व्यक्षरं वचः अंभसि तत्र पार्श्वतोन्न उपसमीपे श्रुतवान् ते

सत्यादिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत तां नाध्यगच्छद्दृशमत्र संमतां प्रपंच
निर्माणविधिर्यया भवेत् ५ स चिंतयन् द्व्यक्षरमेकदांभस्युपाशृणोद्द्विर्गदितं वचो विभुः स्पर्शेषु
यत्षोडशमेकविंशं निष्किंचनानां नृप यद्धनं विदुः ६ निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य
तत्रान्यदपश्यमानः स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः ७

अक्षरे दर्शयति कादयो मावसानाः स्पर्शाः तेषु यत्षोडशं त इति तकारः पंचैकविंशं पकारः वचसो निर्देशार्थं तदर्थ
माह हे नृप निष्किंचनानां त्यक्तधनानां धनं यद्विदुः येन तपोधना इति प्रसिद्धाः तच्च द्विर्गदितं तप तपेति तपेति लो
एमध्यमपुरुषैकवचनं तस्य वीप्सा सादरविधिरूपाभ्यर्थणादित्यर्थः ६ एवं निशम्य तस्य वचसो वक्तुर्दिदृक्षया त
तः प्रचलितः सन् दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केनचित्प्रत्यक्षं नियुक्त इव तच्चात्मनो हितं विमृश्य तप
सि मनो धत्तवानित्यर्थः ७

तस्यदर्शनेनयआह्लादःतेनपरिप्लुतंव्याप्तंआंतरमंतःकरणंयस्य हृष्यंतीरोमांचितातनुर्यस्य प्रेमभरेणाश्रुपूर्णेलोचनेषु
यस्य विश्वसृक्ब्रह्मा पारमहंस्येनपथाज्ञानमार्गेण १५ तंब्रह्माणंभगवान्बभाषेप्रजाविसर्गेकार्येनिजशासनार्हणंस्व
नियोगार्हं प्रजाविसर्गेसमुपस्थितमितिवान्वयः ईषत्स्मितेनरोचिर्दीप्तिःशोभायस्याःतयागिरा १६ वेदगर्भेतिसंबोधय
न्वेदान्संचारयति सिसृक्षयाहेतुनाचिरंसंभृतेनतपसाहंसम्यक्तोषितः दुस्तोषः तोषयितुमशक्यः १७ मा इति मांश्रेयसां

तद्दर्शनाह्लादपरिप्लुतांतरोहृष्यत्तनुःप्रेमभराश्रुलोचनः ननामपादांबुजमस्यविश्वसृग्यत्पारमहंस्ये
नपथाधिगम्यते १५ तंप्रीयमाणंसमुपस्थितंतदाप्रजाविसर्गेनिजशासनार्हणं बभाषईषत्स्मितशोचि
षागिराप्रियःप्रियंप्रीतमनाःकरेस्पृशन् १६ ॥श्रीभगवानुवाच॥ त्वयाहंतोषितःसम्यग्वेदगर्भसिसृक्षया
चिरंभृतेनतपसादुस्तोषःकूटयोगिनां १७ वरंवरयभद्रंतेवरेशंमाभिवांछितं ब्रह्मञ्छ्रेयःपरिश्रामः
पुंसांमद्दर्शनावधि १८ मनीषितानुभावोयंममलोकावलोकनं १९ यदुपश्रुत्यरहसिचकर्थपरमंतपः
प्रत्यादिष्टंमयातत्रत्वयिकर्मविमोहिते २०

फलानांपरिश्रामः परिश्रमःसाधनप्रयासः ममदर्शनमवधिर्यस्य तस्याअतोधिकंफलंनास्तीत्यर्थः १८ एतच्चमत्कृपयैवत्वया
प्राप्तमित्याह मनीषितमभिप्रायं तुभ्यमिदंज्ञातव्यमितियामेच्छा तस्यानुभावोयं कोसौतमाह ममलोकस्यावलोकनं यत् १९
नचैवंममैवतपोबलेनप्राप्तमितिस्वातंत्र्यंमन्यस्व तत्रापितेरपिमत्कृतत्वादित्याह रहसितपतपेतियद्वचउपश्रुत्य परमंतप
श्चकर्थकृतवानसि तदपित्वांप्रतिमयैवादिष्टंउपदिष्टं कदा तत्र तदासृष्ट्यारंभे त्वयिकर्मणिकार्ये विमोहितेसति २०

पार्षदान्प्रनुवर्यपुनरपिलोकमनुवर्णयति भ्राजिष्णुभिर्देदीप्यमानाभिः प्रमदोत्तमानांदिवःकांतयस्ताभिर्विद्योत
मानःसहविद्युद्भिर्वर्तमानाःसविद्युतःताभिरभ्रावलिभिःतत्रविद्युतइवस्त्रियःअभ्रपंक्तयइवविमानानि नभइवलोकः
१२ श्रीसंपत्रूपिणीमूर्तिर्मतीमानंसृजां विभूतिभिर्नानाविभवैःप्रेंखंआंदोलनंश्रितासुकुसुमाकरोवसंतस्तस्यानु
गाभ्रमरास्तैर्विविधंगीयमानास्वयंतुप्रियस्यहरेःकर्मगायतीभवतीति १३ यएवंभूतोलोकःतत्रतस्मिन्भ्राजिष्णुभिर्यःपरितोविराजतेलसद्विमानावलिभिर्महात्मनां विद्योतमानाप्रमदोत्तमाद्युभिःस
विद्युदभ्रावलिभिर्यथानभः १२ श्रीर्यत्ररूपिण्युरुगायपादयोःकरोतिमानंबहुधाविभूतिभिः प्रेंखंश्रि
तायाकुसुमाकरानुगैर्विगीयमानाप्रियकर्मगायती १३ ददर्शतत्राखिलसात्वतांपतिंश्रियःपतिं
यज्ञपतिंजगत्पतिं सुनंदनंदप्रबलार्हणादिभिःस्वपार्षदमुख्यैःपरिसेवितंविभुं भृत्यप्रसादाभिमुखं
दृगासवंप्रसन्नहासारुणलोचनाननं किरीटिनंकुंडलिनंचतुर्भुजंपीतांबरंवक्षसिलक्षितंश्रिया
अध्यर्हणीयासनमास्थितंपरंवृतंचतुःषोडशपंचशक्तिभिः युक्तंभगैःस्वैरितरत्रचाध्रुवैःस्वयेवधा
मन्रममाणमीश्वरं १४
सादेश्रभिमुखंदृगेवआसवदवदृष्टंणांहर्षकरीयस्यतंप्रसन्नहासमरु
णलोचनंचाननंयस्य वक्षसिस्थितयाचश्रियालक्षितं अर्हलंकृतमित्यर्थः अध्यर्हणीयंवरिष्ठंसिंहासनं चतस्रःप्रकृति
पुरुषमहदहंकाररूपाः षोडशएकादशेंद्रियमहाभूताख्याःपंचतन्मात्रायाःशक्तयस्ताभिर्वृतंस्वैर्भगैःस्वाभाविकैरैश्वर्या

भा॰ द्वि॰ ३९ अवश्यं च मदीयविज्ञानं तु कं चित्कालं मा भूदिति प्रार्थयते यावदिति भो ईश ते त्वया लौकिकस्य सख्युः सखिवाहं कृत-
करस्पर्शादिना सम्मानेन समानितः सन् प्रजासर्गरूपे ते तव कर्मणि सेवायां स्थितोऽविक्लवोऽव्याकुल एव यावज्जनान् विभजामि
उत्तममध्यमादिभेदेन सृजामि तावत्त्वेन सम्मानाद् हमप्यजः स्वतंत्र इति मानिनो मे समुन्नद्ध उन्नद्धो मदो मा भूत् यद्वा
मदो मा समुन्नद्ध मा समुन्नह्यतां उद्रिक्तो न भवेदित्यर्थः २६ ज्ञानं शास्त्रोत्थं विज्ञानमनुभवः रहस्यं भक्तिः सुगोप्यम

यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनं अविक्लवस्ते परिकर्मणि स्थितो मा मे स-
मुन्नद्धमदोऽजमानिनः २६ ॥श्रीभगवानुवाच॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितं सरहस्यं तदंगं च
गृहाण गदितं मया २७ यावानहं यथाभावो यद्रूपगुणकर्मकः तथैव तत्वविज्ञानमस्तु ते मदनुग्रहात् २८
अहमेवासमेवाग्रे नान्यद्यत्सदसत्परं पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहं २९

विवक्ष्यामि इति निर्दिष्टत्वात् तस्यांगं साधनं २७ यावानिति स्वरूपतः यथाभावः यादृक्सत्तावान् यानि रूपाणि गुणाः क-
र्माणि च यस्य २८ एतदेव सम्यगुपदिशन् यावानित्यस्यार्थं स्फुरयति अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः नान्यत्किं-
चित् यत्सत्स्थूलं असत्सूक्ष्मं परं तयोः कारणं प्रधानं तस्याप्यंतर्मुखतया तदा मय्येव लीनत्वात् अहं च तदा आसमेव
केवलं न चान्यदकरवं पश्चात्सृष्टेरनंतरमप्यहमेवास्मि प्रलये योऽवशिष्येत सोऽप्यहमेव अनेन चानाद्यनंतत्वाद-
द्वितीयत्वाच्च परिपूर्णोऽहमित्युक्तं भवति २९ ॥ ३९

किंच तपो नाम ममैव शक्तिरित्याह तपो मे हृदयं अंतरंगा शक्तिः आत्मा स्वरूपं यस्य ज्ञानमयं तप इति श्रुतेः असामि सं
हरामि बिभर्मि पालयामि वीर्यं शक्तिः २१ अध्यक्षः अधिष्ठाता गुहायां बुद्धौ अवस्थितः यद्यपि वेद तथापीत्यन्वयः
२२ नाथमानस्य याचमानस्य उपतप्यमानस्येति वा हे नाथ नाथय आशंसय प्रयच्छ नाथितं याचितं नाथनाथया श्रीपता
येश्वर्यप्रीतःसु नाथितमेवाह परे तत्संज्ञे अवरे स्थूले च ते रूपं यथा जानीयां २३ यथा च त्वं क्रीडसि तथा तद्विषयां मनीषयां म

तपो मे हृदयं साक्षादात्माहं तपसोऽनघ सृजामि तपसैवेदं ग्रसामि तपसा पुनः बिभर्मि तपसा विश्वं वीर्यं मे
दुश्चरं तपः २१॥ब्रह्मोवाच॥ भगवन्सर्वभूतानामध्यक्षोऽवस्थितो गुहां वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितं २२
तथापि नाथमानस्य नाथ नाथय नाथितं परावरे यथा रूपे जानीयां ते त्वरूपिणः २३ यथात्ममायायोगे
न नानाशक्त्युपबृंहितं विलुंपन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना क्रीडस्यमोघसंकल्प ऊर्णनाभि
र्यथोर्णुते तथा तद्विषयां धेहि मनीषां मयि माधव। २४ भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः नेहमानं
प्रजासर्गं बध्येयं यदनुग्रहात् २५

यि धेहीति उत्तरेणान्वयः नानाशक्त्युपबृंहितं विश्वं विलुंपन् संहरन् विविधं सृजन् बिभ्रत् पालयन् आत्मना स्वयमेव आत्मानं ब्रह्मादिरूपं गृह्णन् क्रीडसि ऊर्णनाभिस्तंतुभिरात्मानमाच्छादयति २६ न किं स्रष्टेह हि न एवं तत्त्वज्ञानं प्रार्थयसे इत्याह भगवता त्वया शिक्षितं अनुशिष्टं अतंद्रितः अनलसः सन् करिष्यामि तर्हि किमनेन तत्त्वज्ञानेन तत्राह यस्मादेवंभूतात्तवानुग्रहात् प्रजासर्गमीहमानः कुर्वन्नपि अहंकारादिभिर्विहीनो न बध्येयमिति ॥ २५ ॥ ॥ ॥

भा० द्वि०
८०

एवं संदिश्य उपदिश्य जनानां परमेष्ठिनं परमे आधिपत्ये स्थितं ब्रह्माणं आत्मनस्तद्रूपं न्यरुणत् अंतर्हितवान् ३४
अंतर्हितः इंद्रियार्थः प्रत्यक्षं रूपं येन तस्मै बद्धांजलिः सन् ३५ तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवर्त्तते इत्याह प्र
जापतिरिति पंचभिः प्रजानां भद्रमन्विच्छन् विमृशन् सेवसार्थकाम्यास्वप्रयोजनेच्छानयायमनियमानन्वतिष्ठत् ३६

श्रीशुक उवाच ॥ संप्रदिश्यैवमजनो जनानां परमेष्ठिनं पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः
३४ अंतर्हितेंद्रियार्थाय हरये विहितांजलिः सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ३५ प्रजा
पतिर्धर्मपतिरेकदा नियमान्यमान् भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ३६ तं नारदः
प्रियतमो रिक्थादानामनुव्रतः शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च मायां विविदिषन्विष्णोर्माये
शस्य महामुनिः महाभागवतो राजन्पितरं पर्यतोषयत् ३७ तुष्टं निशाम्य पितरं लोकानां प्रपिताम
हं देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ३८ तस्मादिदं भागवतं पुराणं दशलक्षणं प्रोक्तं भग
वता प्राह प्रीतः पुत्राय भूतकृत् ३९ नारदः प्राह मुनये सरस्वत्यास्तटे नृप ध्यायते ब्रह्म परमं व्यासाया
मिततेजसे ४०

रिक्थादानां पुत्राणां मध्ये प्रियतमः तं पितरं सेवमानः शीलादीना परितोषया
मास किमिच्छन् विष्णोर्मायां विविदिषन् ३७ निशाम्य दृष्ट्वा तात् वेत्स्य पृष्टः मामा ३८ भगवता चतुःश्लोक्या संक्षेपेण
प्रोक्तं विस्तरेण प्राह दशलक्षणानि लक्षणीया अर्था विद्यंते यस्मिन् तत् ३९ तत्संप्रदायतो भागवतं मया ज्ञा

८०

यथात्ममायायोगेनेत्यनेन मायाया अपि पृष्टत्वाद्वक्ष्यमाणोपयोगित्वाच्च मायां निरूपयति ऋतेऽर्थं विनापि वास्तवम-
र्थं यद्यतः किमप्यनिरुक्तं आत्मन्यधिष्ठाने प्रतीयेत सदपि च न प्रतीयेत तच्चात्मनो मम मायां विद्यात् यथाभा-
सो द्विचंद्रादिरिति अर्थं विना प्रतीतौ दृष्टांतः यथा तम इति तमो राहुः यथा ग्रहमंडले स्थितोपि न दृश्यते सतोऽप्रतीतौ
३० यथाभाव इत्येतत्स्पष्टयति यथा महांति भूतानि भौतिकेष्वनुसृष्टेष्वनंतरं प्रविष्टानि तेषूपलभ्यमानत्वात् अप्र-
विष्टानि च प्रागेव कारणतया तेषु विद्यमानत्वात् तथा तेषु भूतभौतिकेष्वहं एवंभूता मम सत्तेत्यर्थः ३१ साधनमाह

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि तद्विद्यादात्मनो मायां यथाभासो यथा तमः ३० यथा म-
हांति भूतानि भूतेषूच्चावचेष्वनु प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं ३१ एतावदेव जि-
ज्ञास्यं तत्त्वजिज्ञासुनात्मनः अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ३२ एतन्मतं समाति-
ष्ठ परमेण समाधिना भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ३३

आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्यं तदेवाह अन्वयः कार्येषु कारणत्वेनानुवृत्तिः कारणा-
वस्थायां च तेभ्यो व्यतिरेकः तथा जाग्रदाद्यवस्थासु तत्साक्षितयान्वयः व्यतिरेकश्च समाध्यादौ एवमन्वयव्य-
तिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा च तदेवात्मेति ३२ यस्मात्प्रार्थितं नेहमानः प्रजासर्गमिति तत्प्रसादीकरोति एतन्मतं स-
म्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण कल्पेषु विकल्पाः विविधाः सृष्टयस्तेषु विमोहं कर्तृत्वाभिनिवेशं न यास्यतीति

वैकुंठस्य भगवतो विजयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानं स्थितस्य भक्तेषु तस्यानुग्रहः पोषणं तदनुगृहीता
नां सतां मन्वंतराधिपतीनां धर्मः कर्मणां वासनाः वेञ् तंतुसंताने ऊयंते कर्मभिः संतन्यंत इत्यूतयः यद्वा ऊढ्यर्थो संश्लेषा
र्थान्वाचयतेर्धातोः सिद्धरूपं ऊयंते कर्मभिर्बद्ध्यंते संश्लिष्यंत इति वा ऊतय इत्यर्थः ४ हरेरवतारानुचरितं अस्यानुवर्त्तिनां
च सत्कथाः ईशानुकथाः प्रोक्ता इत्यर्थः ५ अस्यात्मनो जीवस्य हरेर्योगनिद्रामनु पश्चात् शक्तिभिः स्वोपाधिभिः सह शय
नं लयः निरोधः अन्यथारूपमविद्ययाध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ६ आभासः सृष्टिः निरो

स्थितिर्वैकुंठविजयः पोषणं तदनुग्रहः मन्वंतराणि सद्धर्म ऊतयः कर्मवासनाः ४ अवतारानुचरितं
हरेश्चास्यानुवर्त्तिनां पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ५ निरोधोस्यानुशयनमात्मनः
सह शक्तिभिः मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः ६ आभासश्च निरोधश्च यतश्चाध्यवसीयते स
आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ७ योध्यात्मिकोयं पुरुषः सोसावेवाधिदैविकः यस्तत्रोभयवि
च्छेदः पुरुषो ह्याधिभौतिकः ८

धो लयश्च यतो भवति अध्यवसीयते प्रकाशते च स ब्रह्मेति परमात्मे
ति प्रसिद्धः आश्रयः कथ्यते ७ आश्रयस्वरूपमपरोक्षानुभवेन स्पष्टं दर्शयितुमध्यात्मादिविभागमाह योयमध्यात्मिकः पु
रुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवाधिदैविकः चक्षुराद्यधिष्ठाता सूर्यादिः तत्रैकस्मिन्नेव उभयः छिद्रूपो विच्छे
दो यस्मात् स आधिभौतिकः चक्षुर्गोलकाद्युपलक्षितः दृश्यो देहः पुरुष इति पुरुषस्य जीवस्योपाधिः सवा एष पुरुषोन्नरसमय इ

भागवत[illegible]व्याख्याने नैवं तत्र प्रश्नानामुत्तरं दास्यामीत्याह ॥ यदुतेति पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिता इत्या
दिना वै राज्ञा सुरूपाद्दिदं विश्वं कथमासीदिति यदहं त्वया पृष्टः तद्यथावदुपाख्यास्यामि शृणु इति ॥ ४१ ॥ इति द्वितीये
नवमः ॥ ९ ॥ ततो भागवतव्याहृतैर्वै दशमे स्फुटं राजप्रश्नोत्तरं वक्तुमारेभे वादरायणिः ॥ अतीतानंतराध्याये तद्दशल
क्षणपुराणं प्राहेत्युक्तं तानि दशलक्षणानि दर्शयति अत्रेति मन्वंतराणि चेशानुकथाश्चेति द्वंद्वः सर्गादयोऽत्र दशार्थाः

यदुताहं त्वया पृष्टो वै राज्ञा सुरूपादिदं यदासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ४१ ॥ इति श्री
मद्भागवते महापुराणे द्वितीयस्कंधे श्रीभागवतप्रवृत्तिर्नवमोध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ अत्र
सर्गो विसर्गश्च स्थानं पोषणमूतयः मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः १ दशमस्य विशु
द्ध्यर्थं नवानामिह लक्षणं वर्णयंति महात्मानः श्रुतेनार्थेन चांजसा २ भूतमात्रेंद्रियधियां ज
न्म सर्ग उदाहृतः ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ३ तद्व्यंते १ नन्वेवमर्थभेदाच्छास्त्रभेदः
स्यात्तत्राह दशमस्याश्रयस्य विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपं एकस्यैव प्राधान्यान्नायं दोष इत्यर्थः
नन्वत्र नैवं प्रतीयते अत्राह श्रुतेन श्रुत्यैव स्तुत्यादिस्थाने पुनः अंजसा साक्षात् वर्णयंति अर्थेन तात्पर्येण व्याचक्षते
व्याख्यानेषु २ सर्गादीनां प्रत्येकं लक्षणमाह भूतानि आकाशादीनि मात्राणि च शब्दादीनि इंद्रियाणि च धीशब्देन
महदहंकारौ गुणानां वैषम्यात् परिणामात् ब्रह्मणः परमेश्वरात्[illegible]नां यद्विराट् रूपेण स्वरूपतश्च जन्म सर्गः

भा० द्वि०
६२

तस्य प्रभावमाह द्रव्यं उपादानं कर्मादीनि निमित्तानि जीवो भोक्ता यस्यानुग्रहात्संति कार्यक्षमा भवंतीत्यर्थः १२ यो
गएन तल्पशय्यायास्तस्मात् वीर्यं गर्भरूपं हिरण्मयमिव प्रकाशावङ्कुलं १३ तस्यैव प्रपंचः अथेत्यादिना १४
अंतःशरीरे य आकाशः तस्मात् क्रियाशक्त्या तत्र विविधं चेष्टमानस्य सतः ओजः इंद्रियशक्तिः सहो मनःशक्तिः

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च यदनुग्रहतः संति न संति यदुपेक्षया १२ एको नानात्व
मन्विच्छन्योगतल्पात्समुत्थितः वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा १३ आधिदैवमथा
ध्यात्ममधिभूतमिति प्रभुः अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु १४ अंतःशरीर आकाशा
त्पुरुषस्य विचेष्टितः ओजः सहो बलं जज्ञे ततः प्राणो महानसुः १५ अनुप्राणंति यं प्राणाः प्राणंतं
सर्वजंतुषु अपानंतमपानंति नरदेवमिवानुगाः १६ प्राणेनाक्षिपता क्षुत्तृडंतरा जायते प्र
भोः पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत १७

बलं देहशक्तिः ततः शक्त्यात्मकात्सूक्ष्माद्रूपात्
प्राणः सूत्राख्यः महान्मुख्यः असुः प्राणः सर्वेषां १५ महत्त्वं दर्शयति प्राणा इंद्रियाणि यं प्राणंतं चे
ष्टां कुर्वंतं अनुपश्चात्प्राणंति चेष्टां कुर्वंति अपानंतं चेष्टां त्यजंतं अनु अपानंति चेष्टां त्यजंति राजानं अनु भृ
त्या इव १६ क्षिपता चालयता निमित्तेन क्षुत्तृडादिकं विराड्जीवाभेदेनोपासनार्थमुक्तं जायते स्म ततः जक्षतः

भक्तपिपासु भिन्नमिच्छत इत्यर्थः प्राक् प्रथमं निरभिद्यत वि
भक्तमभूत् १७

६२

एकमेकतराभावे इत्येतेषामन्योन्यसापेक्षसिद्धित्वेन अनात्मत्वं दर्शयति तथाहि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सि
ध्यति नापि द्रष्टा न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः न च तं विना करणं प्रवर्त्तते न च तद्विना दृश्यमित्ये
वमेकतरस्याभावे एकं नोपलभामहे तत्र तदा तत्त्रितयं आलोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमा
त्मा आश्रयः तेषामपि परस्परमाश्रयत्वमस्त्येवेति तद्व्यवच्छेदार्थं विशेषणं स्वाश्रयः अनन्यादयः स चासावन्येषामाश्रयश्चे
ति तथा च भगवान् वक्ष्यति दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिध्यति यः स्वतः खे आत्मा यदेषामपरो य आद्यः स्वयानुभूत्या
खिलसिद्धसिद्धिरिति एतेनैव व्यभिचारित्वात्तेषां मायामयत्वमप्युक्तं अत एव पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः

एकमेकतराभावे यदा नोपलभामहे त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ९ पुरुषोऽण्डं वि नि
र्भिद्य यदासौ स विनिर्गतः आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचीः शुचिः १० तास्ववात्सीत्स्वसृष्टा
सु सहस्रपरिवत्सरान् तेन नारायणो नाम यदापः पुरुषोद्भवाः ११ लोकैरमुष्यावयवाः सपालैरित्यनेनो
क्तो विरोधोऽपि परिहृतः ९ उक्तमेवाध्यात्मादिविभागं प्रपंचयन् यदुक्तं त्वया एष वैराजात्पुरुषादिदं यथासीत्तदुपाख्या
स्य इति प्रतिज्ञातं तदुत्पत्तिप्रकारमाह पुरुष इत्यादिना पुरुषो वैराजः अंडं विनिर्भिद्य पृथक्कृत्य विनिर्गतः पृथक्स्थि
त इत्यर्थः अयनं स्थानं अन्विच्छन्विमृशन् यतः शुचिः स्वयमतः शुचीः शुद्धा अपः गर्भोदकसंज्ञा अस्राक्षीत्ससर्ज १०
अप्सु वासं नारायणनाम निरुक्त्या स्पष्टयति तेन अप्सु वसितत्वाद्यस्मात्पुरुषो नरः तस्मादुद्भवो यासां ता नाराः आपोऽयनम
स्येति नारायण इत्यर्थः तदुक्तं आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति ११

मृदुत्वं च काठिन्यं च लघुत्वं च गुरुत्वं च औष्ण्यं च शीतत्वं च शीततां चेत्यर्थः यद्यप्युष्णत्वमपीन्द्रियविषय एव तथापि तस्य जिघृक्षाभावादेवमित्युक्तं गुर्वौष्ण्येति पाठे यस्मादेशम्भूतं वस्तुन एतान् धर्मान् जिघृक्षतस्त्वक् निर्भिन्ना त्वगिन्द्रियाधिष्ठानमित्यर्थः तस्यां रोमाणि इन्द्रियं महीरुहाश्च देवता जाताः वस्तुनि हस्तेनास्पृष्टे लघुत्वगुरुत्वयोर्ज्ञानात् तयोरपि त्वगिन्द्रियविषयत्वपौराणिकाः तत्र त्वचि अन्तर्बहिश्च वातो वृतः आवृत्य स्थितः कर्तरि निष्ठा कथंभूतः त्वचा लब्धो गुणः स्पर्शो येन अयमर्थः त्वगिन्द्रियमेव बहिः कण्डूतिसहितं स्पर्शं गृह्णात् लोमशब्देनोच्यते तत्र महीरुहाणां देवतात्वं अन्तर्बहिश्च स्पर्शं गृह्णाति तदेव त्वक्शब्देनोच्यते तत्र वातो देवता तथा च तृतीये वक्ष्यति त्वचमस्याभिनिर्भिन्नां विविशु

वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीततां जिघृक्षतस्त्वङ्निर्भिन्ना तस्यां रोममहीरुहाः तत्र चांतर्बहिर्वातस्त्वचा लब्धगुणो वृतः २३ हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया तयोस्तु बलवानिंद्र आदानमुभयाश्रयम् २४ गतिं जिगीषतः पादौ रुरुहातेभिकामिकां पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः २५

धिष्ण्यमोषधीः अंशेन लोमभिः कंडूं यैरसौ प्रतिपद्यते निर्भिन्नान्यस्य चर्मणि लोकपालोऽनिलो विशत् प्राणेनांशेन स स्पर्शं येनासौ प्रतिपद्यते इति तत्र चर्मणीति चर्मोपलक्षिता त्वगित्यर्थः प्राणेनांशेनेति प्राणवायुव्याप्तेन त्वगिन्द्रियेणेत्यर्थः वक्ष्यति च श्रुतौ त्वेक एवांश निर्दिष्टः त्वङ्निर्भिद्यत त्वचो लोमानि लोमभ्य औषधिवनस्पतय इति २३ रुरुहतुर्निर्भिन्नौ बलमिन्द्रियं इन्द्रो देवता तदुभयाश्रयं आदानकर्म २४ अभिकामिकां अभीष्टाविहितामित्यर्थः पद्भ्यां सह यज्ञो विष्णुरेव स्वयं तदधिष्ठातृरूपेण स्थितः कर्मभिरिति गत्याख्यैः

तालुअधिष्ठानं जिह्वा इंद्रियं नानारसो विषयः वरुणश्च देवता ज्ञातव्या एवं सर्वत्र अधिष्ठानमिंद्रियं देवता विषय
इत्येतच्चतुष्टयमनूक्तमप्यूह्यं १८ विवक्षोः वक्तुमिच्छोः मुखत एव वह्निर्देवता वाक् इंद्रियं व्याहृतं भाषणं त
योरिति इंद्रियदेवताधीनत्वं कर्मणो दर्शयति १९ नभस्वति प्राणवायौ दोधूयति दोधूयमाने अत्यंतं प्रचलति
सति तत्र च नासिकायां वायुर्देवता गंधं वहतीति तथा अनेन गंधो विषयो दर्शितः घ्राणं इंद्रियं जिघृक्षतः गंधग्र

मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते १८ विवक्षोर्मु-
खतो भूम्नो वह्निर्वाग्व्याहृतं तयोः १९ जले चैतस्य सुचिरं निरोधः समजायत नासिके निरभिद्ये
तां दोधूयति नभस्वति तत्र वायुर्गंधवहो घ्राणो नसि जिघृक्षतः २० यदात्मनि निरालोकमात्मा
नं च दिदृक्षतः निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः २१ बोध्यमानस्य ऋषिभिरात्मनस्त
ज्जिघृक्षतः कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः २२

हीतुमिच्छतः २० निरालोकं प्रकाशशून्यं
आसीदिति शेषः निर्मक्षिकमितिवदव्ययीभावः तदा आत्मानं देहं च काराद्न्यच्च वस्तु दिदृक्षतः अक्षिणी
स्यातां ज्योतिः आदित्यो देवता चक्षुरिंद्रियं ततो गुणस्य रूपस्य ग्रहो ग्रहणं अनेन रूपं विषयो दर्शितः २१ ऋषि
भिर्वेदैर्बोध्यमानस्य तत आत्मनः प्रबोधनं ग्रहीतुमिच्छतः ततो गुणग्रहः शब्दग्रहणं २२

तदेवमधिदैवादिभेदं विभज्योक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्यां त्वक् स्थूलं चर्म चर्मेतद परिस्थितं सूक्ष्मं
त्वमांसयोस्थ्यंतानां द्वंद्वैकवद्भावेन निर्देशः सप्त ये धातवः ते भूम्यप्तेजोमयाः ते पांचपांचभौतिकत्वेपि वाय्वाकाशयोराहाराद्वि
रूपेणासंवर्द्धकत्वाभावादेवमुक्तं ३१ गुणात्मकानि गुणेषु आत्मा येषां विषयाभिमुखस्वभावानीत्यर्थः गुणाः शब्दादयः भू
तादिरहंकारः ततः प्रकर्षेण भवंतीति तथा अहंकारकल्पितशोभनस्वभावाः न वस्तुतस्तथेत्यर्थः अत्र हेतुः अतो मन एव सर्व

त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः भूम्यप्तेजोमयाः सप्त प्राणो व्योमांबुवायुभिः ३१ गुणा
त्मकानींद्रियाणि भूतादिप्रभवा गुणाः मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ३२ एतद्भगवतो रू
पं स्थूलं ते व्याहृतं मया मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ३३ अतः परं सूक्ष्मतममव्यक्तं निर्वि
शेषणं अनादिमध्यनिधनं नित्यं वाङ्मनसः परं ३४ अमुनी भगवद्रूपे मया ते अनुवर्णिते
उभे अपि न गृह्णंति मायासृष्टे विपश्चितः ३५

विकाराणामात्मा स्वरूपं बुद्धिस्तु तथाभूतार्थविज्ञानरूपिणी न तु परमार्था हि णीति वैराग्यार्थमुक्तं अनेनैव बुद्धिमनसोः स्व
रूपं चोक्तं ३२ उपसंहरति एतदिति प्रकृत्यासहाष्टभिः ३३ स्थूलमुक्त्वा सूक्ष्मं समष्टिलिंगशरीरमाह अतः परं अस्य कारण
भूतं सूक्ष्मं अतींद्रियं यतः अव्यक्तं ततः यतो निर्विशेषणं ततः अनादिमध्यनिधनं उत्पत्तिस्थितिलयशून्यं नित्यं स
दैकरूपं अपक्षयादिशून्यमित्यर्थः अत एव वाक् च मनश्चेति द्वंद्वैकवद्भावः तस्मात्परं ३४ उपासनार्थं भगवत्यारोपितं रूपद्व ६४
यमपवदति अमुनी इति न गृह्णंति वस्तुतो नांगीकुर्वंति यतो मायासृष्टे ३५

प्रजाऽऽपत्यं आनंदो रतिः अमृतं स्वर्गादिः तदर्थिनः शिश्नः अधिष्ठानं उपस्थ इंद्रियं प्रजापतिश्चासीदिति ज्ञेयं तदु
भयाश्रयं इंद्रियदेवताश्रयं कामानां स्त्रीसंभोगानां संबंधि प्रियं सुखं २६ धातुमलं भुक्तान्नादीनामसारांशं सत्य
क्तुमिच्छोः गुदपायुमित्रोत्सर्गाः अधिष्ठानेंद्रियदेवताविषयाः २७ पुर्या देहात्पुरः देहांतराणि आसिसृप्सोः
सर्वतो गंतुमिच्छोः निरभिद्यते इत्यनुषंगः अपानतः अपगच्छतः पृथक्त्वं मरणं नाभ्यादीन्यधिष्ठानादीनि ना
भ्यां हि प्राणापानयोर्बंधविश्लेषे मृत्युरिति प्रसिद्धं २८ अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षिश्च अंत्राणि च ना

निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयं २६ उ
त्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदं ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः २७ आसिसृप्सोः पुरः
पुर्या नाभिद्वारमपानतः तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयं २८ आदित्सोरन्नपानानामा
सन्कुक्ष्यंत्रनाड्यः नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये २९ निदिध्यासोरात्ममायां हृदयं निर
भिद्यत ततो मनस्ततश्चंद्रः संकल्पः काम एव च ३० ड्यश्चासन् तत्र कुक्षिरधिष्ठानं अंत्राण्यन्नसंग्रहे कर
णानींद्रियस्थानीयं नाड्यस्तु पानसंग्रहे तयोर्नाड्यंत्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तुष्टिः उदरभरणं पुष्टिस्तु
सपरिणामतः स्थौल्यं तदाश्रये तदुभयनिमित्ते तत्र अन्नसंग्रहेच्छोः कुक्ष्यंत्रसमुद्रतुष्टय इति च तुष्टयं पेयसंग्रहे
च्छोः कुक्षिनाडीनदीपुष्टय इति विवेकः २९ निदिध्यासोर्निरंतरां चिंतयितुमिच्छोः कामोऽभिलाषः हृदयमनःचंद्रसंक

भा० द्वि०
४५

अन्याभ्यां गुणाभ्यां स्वभावो गुणः उपहन्यतेऽनुविध्यते ३९ ब्रह्मरूपेण स्रष्टृत्वमुक्त्वा विष्णुरूपेण पालकत्वमाह स एव भ-
गवान् तिर्य्यगाद्यवतारैरिदं विश्वं स्थापयन् धर्मरूपेण पुष्णाति भोगैः संवर्द्धयति ४० रुद्ररूपेण संहर्तृत्वमाह तत इति आत्मनः
सकाशात् यदिदं सृष्टं तत्सन्नियच्छति संहरति ४१ कर्तृत्वाद्युपवादेन दोषमस्य मुक्तिमाह इत्थंभावेन स्रष्टृत्वादिरूपेण तस्माद्वा
एतस्मादात्मनः आकाशः संभूतः सोकामयत बहु स्यां प्रजायेयेत्यादिश्रुत्या कथितः स्वरूपं तु परं केवलमित्थंरूपेणैव द्रष्टुं नार्हन्
ति ४२ तत्र किं यतः अस्य विश्वस्य जन्मादौ कर्मणि परमेश्वरस्य इत्थंभावः कर्तृत्वं नास्ति क्रत्यापितात्पर्येण न प्रतिपाद्यते किं

तत्राप्येकैकशो राजन्भिद्यंते गतयस्त्रिधा यदेकैकतरोन्याभ्यां स्वभाव उपहन्यते ३९ स एवेदं जगद्धा-
ता भगवान्धर्मरूपधृक पुष्णाति स्थापयन्विश्वं तिर्यङ्नरसुरात्मभिः ४० ततः कालाग्निरुद्रात्मा यत्सृष्ट-
मिदमात्मनः संनियच्छति कालेन घनानीकमिवानिलः ४१ इत्थंभावेन कथितो भगवान्भगवत्तमः
नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ४२ नास्य कर्मणि जन्मादौ परस्यानुविधीयते कर्तृत्वप्रतिषेधा-
र्थं माययारोपितं हि तत् ४३ अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः विधिः साधारणो यत्र सर्गाः प्राकृ-
तवैकृताः ४४

तु अनुविधीयते अनुवर्ण्यते किमर्थं कर्तृत्वप्रतिषेधार्थं हि यतो मायया तदारोपितं प्रकाशितं तथा च श्रुतिः निष्कलं
निष्क्रियं शान्तं निरवद्यं निरंजनं इन्द्रो मायाभिः पुरुरूप ईयते इत्याद्या ४३ उक्तमर्थमुपसंहरति ब्रह्मणः संबंधी कल्पो
महाकल्पः विकल्पोऽवान्तरः तत्सहितः उदाहृतः उदाहरणत्वेन संक्षेपत उक्तः कथंभूतः यत्र महाकल्पे प्राकृताः
महदादिसर्गाः अवान्तरकल्पे च वैकृताः स्थावरादिसर्गा इत्ययं विधिः प्रकारः अन्यैर्महाकल्पादिभिः साधारणः ४४ ४५

यद्रूपप्रसुलाकर्मकं यदुक्तं भगवता ब्रह्माणं प्रति तत्प्रपंचयितुं ब्रह्मादिरूपाणि तत्कर्माणि चाह स इत्यादिना इत्थंभावेनेत्यत्न: २९
प्राक्तनेन ग्रंथेन स भगवान् ब्रह्मरूपधृक् सन् वाच्यवाचकतया नामानि वाच्यतया रूपाणि क्रियाश्च धत्ते सृजतीत्यर्थः मा
यया सकर्मा सव्यापारः सन् वस्तुतस्त्वकर्मकः ३६ एतत्प्रपंचयति प्रजापतीनिति सार्द्धैस्त्रिभिः द्वितीयांतानां धत्ते इत्यने
नान्वयः तत्र प्रजापत्यादीनि नामानि तद्वाच्यानि रूपाणि तत्तत्कर्माणि च ज्ञेयानि पृथक् तत्तद्वोत्तरभेदेन गिरीनि

स वाच्यवाचकतया भगवान्ब्रह्मरूपधृक् नामरूपक्रिया धत्ते सकर्मा कर्मकः परः ३६ प्रजापती
ना२ न्मनून्देवानृषीन्पितृगणान्पृथक् सिद्धचारणगंधर्वान्विद्याध्रासुरगुह्यकान् किंनराप्स
रसो नागान्सर्पान्किंपुरुषोरगान् मातृरक्षःपिशाचांश्च प्रेतभूतविनायकान् कुष्मांडोन्मादवेताला
न्यातुधानान्ग्रहानपि खगान्मृगान्पशून्वृक्षान्गिरीन्नृपसरीसृपान् द्विविधाश्चतुर्विधा
ये न्ये जलस्थलनभौकसः ३७ कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः सत्वं रजस्तम इतिति
स्रः सुरनृनारकीः ३८

न्यस्यानंतरं रूपेति संबोधनं द्विविधाः स्थावरजंगमरूपेण चतुर्विधाः जरायुजांडजस्वेदजोद्भिज्जरूपेण जलस्थ
लनभांसि ओकांसि येषां तानपि धत्ते इति सर्वेषामन्वयः ३७ यच्चाग्रजाय एव याचत्यः कर्मगतयो या ह शीहि जस तत्रमे
तित स्यापि प्रसंगादनेनैवोत्तरमाह कुशलाउत्तमाः श्रेष्ठकुशला नीचाः मिश्रा इति परांतरं मिश्राः मध्यमाः कर्मणां
पुण्यापुण्यमिश्राणां गतयः फलानि सत्वादिभेदेन कर्मणां त्रिविधत्वं प्रपंचयति सत्वेनेति सार्द्धेन सत्वादयस्तिस्रो

[illegible]

भा॰ द्वि॰ ९६ वक्ष्यमाणं विस्तारं प्रतिजानीते परिमाणं स्थूलं सूक्ष्मं च कल्पस्य लक्षणं इयान् एवंरूप इति तद्विग्रहं अवांतरकल्पमन्वंतरादिलि
पविभागं च यथावद्विस्तरेण पुरस्तात्तृतीयस्कंधे व्याख्यास्यामि तत्र पाद्मं कल्पं अथो इति कार्त्स्न्येन व्याख्यायमानं शृणु ४४ यदु
धीत्यष्टादिनिरूपणं तदेव साक्षात् श्रोतुकामः कथांतरं पृच्छति यदाहेति भुवः संबंधिनि तीर्थानि यद्वा भुवः क्षेत्राणि चेति कौ
षारवे मैत्रेयस्य तस्य क्षत्तुश्च अध्यात्मज्ञानसंश्रितः संवादः पुनरागतवान् तत्र च निमित्तं ब्रूहि ४६ राज्ञा पृष्ट इति अयमर्थः यद्य

परिमाणं च कालस्य कल्पलक्षणविग्रहं यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ४४ ॥शौनक उवा
च॥ यदाह भगवान्सूत क्षत्ता भागवतोत्तमः चचार तीर्थानि भुवस्त्यक्त्वा बंधून्सुदुस्त्यजान् क्षत्तुः कौषारवेस्तस्य
संवादोऽध्यात्मसंश्रितः यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितं बंधु
त्यागनिमित्तं च तथैवागतवान्पुनः ४६ ॥सूत उवाच॥ रा[illegible]परीक्षिता पृष्टो यदवोचन्महामुनिः तद्वोऽभिधास्ये रा
शृणुत राज्ञः प्रश्नानुसारतः ४७ ॥इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे दशलक्षणकथनं दशमोऽध्यायः
॥१०॥
यं पृष्टवान् इदमेव राजापि शुकं पृष्टवान् शुकोऽपि विदुरमैत्रेयसंवादं पुरस्कृत्य ये पूर्वे राज्ञा कृताः प्रश्नाः तदनुसारेण सर्वं पुराण
मवोचत् तदहं वोऽभिधास्यामि तथैव शृणुतेति ४७ श्रीमद्भागवतं येन स्वब्रह्ममुखतो मितं ब्रह्मनारदयोः प्रोक्तं तं वंदे मु
रलीश्वरं यत्स्तवं यत्रितं विघ्नं नरीनर्ति जगत्त्रयं संतस्तमेव पृच्छंतु यदत्र स्खलितं मम द्वितीयस्कंधसंबंधि परमार्थदीपिका उद्दी
पतां मिय सद्धियो व्याख्यातत्वद्दीपिका इं संतामिष्ट्या संतः क्षमंतां मम साहसं मयाद्वितीयवोधायलतं सेतनोसर्वतः ॥ इति श्री द्वितीये दशमोऽध्यायः ॥१०॥ समाप्तं ९६